Digitization by eGangotri-South Center

"वाणीं भजत गैर्वाणीम"

सं. भा प्रचारिण्याः ग्रन्थमालायाः पञ्चदशं कुसुमम्

संस्कृतनिबन्धस्तबकः

नागरी

संकलयिता

विद्याप्रवीण, विद्वान्

श्री नेति सुब्बरायशास्त्री

★

प्रकाशिका

संस्कृतभाषाप्रचारिणी सभा,

चित्तूरु - 517001

1983

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

"वाणीं भजत गैर्वाणीम"

सं. भा. प्रचारिण्याः ग्रन्थमालायाः पञ्चदशं कुसुमम्

संस्कृतनिबन्धस्तबकः

संकलयिता

विद्याप्रवीण, विद्वान्

श्री नेति सुब्बरायशास्त्री

★

प्रकाशिका

संस्कृतभाषाप्रचारिणी सभा,

चित्तूरु - 517001

1983

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्वस्वाम्यं सभाधीनम

द्वितीयावृत्तिः 1000
मूल्यम् रू. 6-50

विजयप्रेस्
चित्तूरु (आ. प्र.)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयावृत्ते प्राक्कथनम्

★

सर्वत्रापि भारते देशे संस्कृतप्रचारं विषयीकृत्य सकटिबन्धं प्रयतमानायाः आन्ध्रप्रदेशीय चित्तूर् नगरस्थ संस्कृतभाषाप्रचारिण्याः सभायाः सुरभिलं पञ्चदशतमं कुसुममिदं प्रातःस्मरणीयानां इदानीं दिवंगतानां पण्डित वराणां श्रीमतां नेति सुब्बरायशास्त्रिमहोदयानामस्मत्सुहृत्तल्लजानां सम्पादकत्वेन प्रथमं प्रकाशितं खिस्ताब्दीय १९६३ तमे वत्सरे प्रथममुद्रणस्य नाम 'व्यासमञ्जरी-इतिनिर्दिष्टं सभया। द्वितीयमुद्रणस्यास्यानन्यार्थकं 'संस्कृत-निबन्ध स्तबकः' इति नाम सभासञ्चालकैर्निर्णीतम्। संस्कृतप्रचारार्थं भारते बहुधा प्रयतितवन्तः श्रीमन्तः ति. कं. तिरुवेङ्कटाचर्यवर्याः प्रायः त्रिंशद्वर्षाण्यस्यास्सभायास्सेवां विधाय रजतोत्सवमपि सुसम्पाद्य त्रिदशेषु संस्कृतप्रचारं कर्तुं प्रायः वर्षस्य स्यात् पूर्वमेव सुधर्मामलञ्चक्रुः। तानधुना स्मारं स्मारमिदं प्राक्कथनं लिखामि।

श्रीमद्भिः सुब्बरायशास्त्रिमहोदयैरस्याः सभायाः कृते विरचिता सेवाऽपि सहकारिणीति आत्मानं धन्यं मन्ये।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सुब्बरायशास्त्रिमहोदयैः स्वीये प्रथममुद्रण निवेदने ग्रन्थस्यास्य प्रयोजनं विस्तरशः सूपपादितम् । सरलया शैल्या निबद्धानां निबन्धानामेषामध्ययनेन संस्कृताध्येतॄणां वाक्यानिर्माणशक्तिः द्रढीयसी भवेदित्यत्र नास्ति संशीतिलेशोऽपि । विश्वस्मिन्नपि विश्वे प्रचलन्त्या अस्या गैर्वाण्या वाण्या अध्ययनं विना आत्मानं भारतीयं कथितुं नार्हत्येव कोऽपि भारतीय इति विदुषामाशयः । सौलभ्येन तदध्ययने ईदृशा ग्रन्थाः समुपकुर्युरिति निश्चप्रचमेव ।

सभेयं सरलसंस्कृतपरीक्षाः प्रतिवर्षं द्विवारं प्रचालयन्ती तदुपयोगीन्येतादृशानि बहूनि पुस्तकानि प्रकाश्याध्येतॄणां महते उपकाराय कल्पते ।

प्रायः आधुनिकीषु आंग्ल - आन्ध्रादिभाषासु वार्तापत्रिकानिर्वाहः दुष्करो भवति । परमनया सभया द्वादशाधिकवर्षेभ्यः संस्कृते मासिकी पत्रिका 'गैर्वाणी' नाम्नी प्रकाश्य, पत्रिकाद्वारेणापि संस्कृतप्रचारः क्रियत इति तत्प्रेमिणामामोदाय भवति ।

५-९-२२/९७, आर्षनगरम्,
हैदराबाद् - आ. प्र.

इति विदुषां चरणरेणुः,
कप्पगन्तुल लक्ष्मणशास्त्री

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निवेदनम्

★

अयि भोस्सहृदयप्रवराः, मान्यवराः,

संस्कृतभाषायां काव्यनाटकाऽऽदीनां प्राचुर्येऽपि गद्यग्रन्थानां निबन्धानां च विरलतेति दूयते मनस्तदभिमानिनाम् ।

संस्कृतभाषायाः सार्वजनीनतासाधने बद्धपरिकरा इयं संस्कृतभाषाप्रचारिणी सभा सरलानां ग्रन्थानां प्रकाशनेन सरलानां तथा क्रमोपचायिनीनां च परीक्षाणां निर्वहणेन च यतते अनुक्षणं तत्सेवने ।

तया कृतेषु क्रियमाणेषु करिष्यमाणेषु च तद्भाषोन्नतिप्रयत्नेषु संस्कृतनिबन्धस्तबकस्य प्रकाशनमपि अन्यतमः प्रयत्नो भवति ।

विद्यायाः फले रचना प्रसङ्गश्च । तयोः विच्छेदादेव हि अतद्विदः दूषयन्ति गैर्वाणीं अव्यवहार्येति । तादृशापोहस्य निराकरणाय गैर्वाण्याः सर्वतोमुख - व्यवहारोपयोगितायाः निरूपणाय च अभ्यासकैः आलापः, उपन्यासः,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लेख इत्यादिकं तयैव कर्तव्यम् । तदैव वाणी स्ववशा भवेत् । अन्याभ्योऽपि भाषाभ्यः सुखं बहुमुखं व्यवहारं च कर्तुं सुकरं भवेत् । तत्साधनायैव अयं संस्कृतनिबन्ध-स्तबकः सम्पादितः। अत्र प्रसिद्धानां बहूनां विदुषां निबन्धाः सङ्कलिताः अध्येतॄणां विभिन्नशैली - परिचयप्रदानाय । विविधाश्च विषयाः समायोजिताः येनैतत्पाठकानां निबन्ध-विरचने बहुमुखी प्रज्ञा विजृम्भेत उपन्यासधोरणी चासाधारणी विराजेत ।

अत्र निर्दिष्टानां निबन्धानां प्रार्थनानुपदमेव प्रेषणेन अनुगृहीतवतां सुगृहीतनामधेयानां पण्डितप्रकाण्डानां कृते मया सादराञ्जलिमात्रमेव समर्प्यते ।

अनवधानताकृताः दोषा यद्यत्रत्या भवेयुः सूचिताः तृतीयमुद्रणे ते कृतज्ञतापूर्वं निराक्रियेरन् ।

इति,

के. मुनिरेड्डिः

प्रकाशकमन्त्री

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

न गृहं गृह मित्याहुः गृहिणी गृहमुच्यते

— ऊटुकूरि लक्ष्मीकान्तम्म

भारते देशे गृहस्थाश्रमः एक एव सकलेष्वाश्रमेषु प्रशस्तो भवति। गार्हस्थ्ये गृहिणीं विना गृहस्थः न सम्पूर्णता मुपयाति। अपत्नीकस्य पुरुषस्य नित्यनैमित्तिकेषु वैदिककर्मसु अधिकार एव नास्ति। अत एव रामभद्रोऽपि सीतापरित्यागानन्तरं प्रतिमासीतां परिकल्प्य अश्वमेध-मकार्षीदिति श्रूयते। 'दाराधीनास्तु स्वर्गा' इति सुभाषित-मपि गृहिण्या एव प्रामुख्यं प्रकटयति। तिष्ठन्तु गृहे श्वशुराऽदयः बहवः पुरुषाः श्वश्र्वादयः बह्व्यः स्त्रियश्च। गृहनिर्वहणाधिकारस्तु गृहिण्या - एवेति दृश्यते। अत एवोच्यते 'गृहिणीप्रधानं गृह' मिति।

परिजनेषु दाक्षिण्यं, गवाश्वप्रभृतीनां पर्यवेक्षणं, अतिथ्यभ्यागताना मादरणं, आयव्ययानां परिशीलनं, सर्व-मेतत् गृहिण्यधीन मेव भवति। विवाहानन्तरं नववधूः पत्युः स्वामिनी भवतीति 'मूर्धानं पत्यु रारोह' इत्यादीनि श्रुति-वचना न्यावेदयन्ति। किञ्च 'अस्मिन् गृहे गार्हपत्याय जागृहि' इत्यादि श्रुतिरपि गृहस्थाश्रमस्य आधारभूतस्य गार्हपत्याग्ने स्संरक्षणाधिकारः गृहिण्या एवेति विशदयति।

भारतीयसंस्कृतेः प्रथमाऽऽविर्भावसमये वेदकालेऽपि गृहेणसह गृहिण्याः अविनाभावसम्बन्ध आसीदिति स्फुटं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रतीयते । तस्मात् गृहिण्या अभावे गृहस्यैवाभाव इति ज्ञायते । किञ्च गृहालङ्कारप्राया गृहिणी गृहकृत्येषु विनियुक्ता, गृहस्य शोभामादधातीति सर्वैरपि ज्ञातपूर्वमेव। बहिर्व्यापारपरतन्त्रः पुरुषः नहि नक्तंदिवं गृहे एव तिष्ठति। तेषु समयेषु गृहिणीं विना गृहनिर्वहणं कस्य अधीनं भवति? शान्तिक्षमानिलयः गृहिणीजनः यदृच्छाऽऽगतानि गृहच्छिद्राणि अतीत्य सुस्थिरां गृहव्यवस्था मुपस्थापयति ।

किञ्च प्रसूतेः गर्भभारोद्वहनस्य, जातानां अपत्यानां स्तन्यादिवितरणै स्संरक्षणस्य,अनियतवेळं आगताना मतिथीना मुपचारस्य, यदा गृहिणी समर्था भवति तदैव गृहव्यवस्था सुस्था भवति । 'कार्येषु दासी करणेषु मन्त्री' इति भर्तृहरि - सुभाषितादपि 'गृहिणी गृहस्थस्य महदुपकरोती'ति स्पष्टं ज्ञातमेव ।

नवनागरिकताव्यामोहमुग्धे अस्मिन् काले शिशुपोषणाऽऽदिकम्, गृहनिर्वहणाऽऽदिकं च गृहिण्याः अवश्यानुष्ठेयः प्रधानो धर्म इति प्रतिभाति । किञ्च 'धनमूलमिदं जगदि'ति सुभाषितस्य उदाहरणभूते अस्मिन् काले बुद्धिमत्या गृहिण्या न केवल मान्तरेषु किन्तु बाह्येष्वपि व्यापारेषु सर्वसमर्थया भवितव्यमिति वक्तुं शक्यते । अत एव 'निखिलधर्माणा माकरो गृहिणी' इति, 'गृहवीक्षणादेव विज्ञायते गृहिण्या श्शुभवृत्तिः' इत्यादीनि सुभाषितानि सङ्गच्छन्ते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

न निश्चितार्थात् विरमन्ति धीराः

'विद्वान्' जन्ध्याल वेंकटसुब्रह्मण्यशास्त्री,
'व्याकरण विद्याप्रवीणः,' 'साहित्य विद्याप्रवीणः'

सूक्ति रियमतीव प्रसिद्धा विराजते। सुभाषित मिदं भर्तृहरिकृते सुभाषितत्रिशतीनामके ग्रन्थे ग्रथितम्। ग्रन्थोऽसावनेकासु भाषासु परिवर्तितः इत्यनेनैव तस्य ग्रन्थस्य कवेश्च महत्त्वं परिज्ञायते। एतत्सूक्तिघटितश्लोकस्तु एवं वर्तते।

रत्नै र्महार्हैः तुतुषुः न देवाः
न भेजिरे भीमविषेण भीतिम्।
सुधां विना न प्रययु र्विरामं
न निश्चितार्थात् विरमन्ति धीराः॥

अस्याय मर्थः —

धीराः = धीमन्तः = विवेकिनः नराः, निश्चितार्थात् = कर्तव्यत्वेन निर्णीतात् विषयात्, न विरमन्ति = विरता न भवन्ति।

लोके बुद्धिशालिनः पुरुषाः कस्यचि त्कार्यस्य आरम्भात् पूर्वमेव एतत्कर्तुमस्माकं शक्यं वा अशक्यं वेति, कर्तु मुचितं वा न वेति च सम्यक् विचार्य, तत्कार्यं कर्तुं वा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अकर्तुं वा निर्णयं कुर्वन्ति । आरब्धस्य च कार्यस्य मध्ये विघ्नाः यद्यपि सम्भवन्ति तथाऽपि ते आरब्धात् कार्यात् नैव विरमन्ति । अत एव ते धीराः इत्युच्यन्ते । प्रशस्तां धियं = ज्ञानसाधनभूतां बुद्धिं, राति = गृह्णातीति धीरः । अनयैव हि धिया मनुष्यः आहारनिद्राभयाऽऽदिसाम्ये सत्स्वपि पशुभ्यः भिद्यते । एनयैव खलु बुद्ध्या संसारस्य असारतां अनित्यतां च निर्धार्य शमदमादिसद्गुणसम्पत्तिं सम्पाद्य आत्मतत्त्वावगतिपूर्वकं अत्रैव मोक्षसाम्राज्यमधिगच्छति धीमान् । एतादृशधीरहितास्तु आत्मतत्त्वजिज्ञासाशून्याः 'पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्' इति श्रीशङ्करभगवत्पादै र्भिर्वर्णितं जननमरणप्रवाहलक्षणं संसार मधिगच्छन्ति ।

अधीराः = अविवेकिनः, विघ्नभयात् किञ्चिदपि कार्यं नैवाऽऽरभन्ते । अत एव ते नीचाः इति अधमा इति च उच्यन्ते । मध्यमास्तु किमपि कार्यं मारभ्य विघ्नैः बाधिताः सन्तः, कार्यं परित्यजन्ति ।

उत्तमाः धीरास्तु 'श्रेयांसि बहुविघ्नानि' इतिरीत्या सत्कार्ये बहुभिः विघ्नैः पदेपदे नितरां पीड्यमाना अपि स्वाभिलषितं श्रेयोऽनुभूतं च कार्यं नैव विसृजन्ति, अयमेवार्थः लोककल्याणमभिलषता भर्तृहरिणा सुभाषितेषु एवं प्रकटितः पद्यरूपेण —

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्ननिहता विरमन्ति मध्याः ।
विघ्नैः पुनःपुनरपि प्रतिहन्यमानाः
प्रारब्ध मुत्तमगुणाः न परित्यजन्ति ।। इति ।।

लोके विघ्नाश्च बहुविधाः आश्चर्यजनकाश्च भवन्ति । कदाचित् कार्यस्य परिसमाप्तेः पूर्वमेव आनुषङ्गिकफलरूपतया लब्धाः विषयाः, कार्यभञ्जकास्सन्तः विघ्नरूपता माप्नुवन्ति । चित्तवृत्तिनिरोधरूपफले निर्विकल्पसमाधौ बद्धलक्ष्याः योगसाधनमभ्यस्यन्तः केचन अचिरादेव लब्धां अणिमादिसिद्धिषु अन्यतमां सिद्धिं प्राप्य आत्मानं कृतार्थंमन्यमानाः योगात् विरम्य भ्रष्टाः भवन्ति ।

तथैव कश्चन विद्यार्थी उच्चतमपरीक्षापर्यन्तं पठितुं कृतनिश्चयः कस्यांचि दांग्लविद्याशालायां प्रविशति यदा च प्रवेशपरीक्षायामुत्तीर्णः भवति, तदनन्तरमेव यदि समधिकवेतनेन शोभितं पदं प्रापितः, तदा सः पठनं परियज्य, सेवावृत्तिं स्वीकृत्य धन्योऽहं इति नन्दति । दृश्यतां अत्र लाभरूपतया परिदृश्यमानैव सेवावृत्तिः, तस्य कार्यभञ्जिका आसीत् ।

धीरस्तु आनुषङ्गिकं एतादृशं फल मवलोक्य विमुग्ध स्सन् न कदाऽपि स्वचिकीर्षितात् कार्यात् विरतो

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भवति। अपि तु स्वाभिलषितफलप्राप्तिपर्यन्तं तत्कर्म करोत्येव। अत्र विषये पौराणिकी गाथा प्रस्तूयते भर्तृहरिणा। 'रत्नै र्महार्हैं' रित्यादिना। सा चैवमस्ति —

अमृतं लब्धुं क्षीरसागरं मथितुं प्रवृत्ताः देवाः क्षीरसागरादुद्भूतैः चिन्तामणिप्रभृतिभिः श्रेष्ठैः वस्तुभिः नैव तृप्ताः। भयंकरेण विषेण च नैव निरुद्योगा आसन्। अपि तु अमृतप्राप्तिपर्यन्तं अविरतयत्ना एवाभूवन् देवाः।

धीराणां लक्षणमित्थं निरुक्तं काळिदासमहाकविना – 'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः' इति। विकारजनकसामग्रीसत्वेऽपि यस्य चित्तं विकारशून्यं वर्तते, स एव धीरः।

अयमेव पुरुषः भगवद्गीतासु स्थितप्रज्ञ इति निर्दिष्टः।

चलन्ति गिरयः कामं युगान्तपवनाऽऽहताः।
कृच्छ्रेऽपि न चलत्येव धीराणां निश्चलं मनः॥

प्रलयकालवायुना पर्वता अपि चलन्तु नाम। धीराणां मनस्तु न कदापि चलति। अयमेवाशयः भर्तृहरिणा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बहुधा उद्घोषितः —

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु,
लक्ष्मी स्समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा,
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ।।

इति नीतिशास्त्रकुशलाः धीरस्य कृत्यं दृष्ट्वा निन्दन्तु, अथवा प्रशंसन्तु । धीरः त न्न गणयति । तथैव तस्य महती सम्पत्तिः भवतु, अथवा दारिद्र्यं भवतु । तदपि न गणयति । एवमेव अद्यैव मरणं भवतु, युगान्तरे वा भवतु तदपि अविगणय्य धीरः न्याय्यात् मार्गात् एकं पदमपि न चलति ।

सुभाषितस्यास्य तत्त्वं प्रामुख्यं च सम्यक् विज्ञायैव कीर्त्या भासमानाः श्रीगोखले - तिलक् - चित्तरञ्जनदास् - मोतीलाल् - मालवीय - बोस् - गान्धिप्रभृतयो धीराः अचलितस्वभावाः, वसुधैककुटुम्बिनः, परार्थैकप्रयोजनाश्च देशीयनायकाः, परदेशीयैः परिपालनच्छलेन परिपीड्यमानां रत्नगर्भां अस्मदीयां भारतमातृभूमिं दास्यात् विमोचयितुं स्वातन्त्र्यसमराय बद्धपरिकराः आरब्धसत्याग्रहोद्यमाश्च, मध्येकालं समधिगतैः स्वातन्त्र्याऽऽभासरूपैः अत्यल्पैः फलैः, दण्डप्रहाराऽऽदिभिः बहुविधैः विघ्नैश्च पदेपदे शासकाऽऽदेशेन नितरां पीड्यमाना अपि अपरिच्युतस्वीयलक्ष्याः स्वीयं धनं,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्वीयं स्वास्थ्यं स्वीयं जीवन मपि, तृणमिव मत्वा, भारत-देशस्यास्य सम्पूर्णस्वातन्त्र्यसम्पादने कृतकृत्या आसन्निति महान् प्रमोदः।

तदीय एव मार्गः इदानीं बुद्धिशालिभिः उत्तमगुण-भूषितैः नेतृभिः अनुगम्यते । ते प्रपञ्चशान्ति, भारतस्य सर्वतोमुखा मभिवृद्धिं च सम्पादयन्ति ।

सुभाषितमिदं सम्यक् मानयित्वा निश्चले मनो-दर्पणे, अस्मद्देशस्य इतोऽधिकः उत्कर्षः यथा सम्पादितो भवेत्, तथा प्रयतितव्य मस्माभि रिति निवेद्यते ।

लोका स्समस्ता स्सुखिनो भवन्तु !

सम्पत्तौ च विपत्तौ च महता मेकरूपता

चल्ला सत्यनारायणशास्त्री

'हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा' इति हि सुभाषितम् । हेम्नो गुणदोषौ विवेचयितु मग्निरिव मानवानां गुणशीले निश्चेतु मापदो निकषोपलाः। आपत्सु प्राय स्सर्वेषां मनांसि विकार मापद्यन्त एव ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

केचन सम्पत्तावपि माद्यन्तः विकुर्वते । विकारहेतौ सम्पत्तौ विपत्तौ च येषां मनांसि न विक्रियन्ते त एव धीरा महात्मान इति लोकोक्ते रर्थः ।

प्रायः सर्वोऽपि धर्मोत्तरेणैव पथा जीवित मतिवाहयितु मिच्छति । यावान्कालः सुखेन गच्छति तावत्पर्यन्तं सत्यधर्मौ नातिक्रामति, प्रबोधयति च । यदा हि विपत्तयः अभिभवन्ति तदा सत्यधर्मौ दूरीकुरुते । असत्य मधर्म्यं च पन्थान मास्थाय सुखेन विपदं तरितु मिच्छति । 'धर्मो रक्षति रक्षितः' इति सूक्ति नाभिजानाति । जानन् वा न तत्र मनः कुरुते । यद्यपि कोऽपि कदाचित् अधर्म्येण पथा गच्छन् विजयं प्राप्नुयात् तथाऽपि स स्वकृतं निन्द्यं कर्म अवगूहितुं असत्यं सत्यमिति — अधर्म्यं धर्म्यमिति च बहुधा विप्रलभेत । तदिद मनर्थपरम्पराया द्वारं भवति । अन्ते च पश्चात्तप्तचित्तः सत्यधर्मौ पुनः शरणं प्रपद्यते ।

केचि दापदनभिभूता अपि कष्टमजानन्तेऽपि सम्पन्ना अपि प्रकृत्या वामाचारा भवन्ति । ते च नररूपा एव राक्षसा इत्युच्यन्ते । असति च विकारहेतौ सर्वेऽपि धार्मिकाः, शीलवन्तश्च भवन्तु तत्र न कोऽपि विशेषः स्यात् । आपद श्चाभिभूय यो हि निर्विकारस्तिष्ठति स एव प्रशंसायाः पात्रं भवति नान्यः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मानवानां चित्तशुद्धिपरीक्षार्थ मापदः भगवता कल्प्यमाना इत्यभियुक्तनामुक्तिः। अत्र परीक्षा सूत्तीर्णा विजयिन एव भगवदनुग्रहपात्रतां भजन्ते। अनुत्तीर्णाश्च विषमपद मधर्म्यपथ मवलम्बमानाः पदेपदे स्खलन्तः क्रमेण अधःपतिता इहपरागतिदूराश्च भवन्ति। अमुमेवार्थं महाकविः काळिदासः स्वकीये कुमारसम्भवे 'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः' इति सूक्ति मुखेन व्याचष्ट। धीरा नाम पण्डिता ध्यानशीलाः क्रियावन्तो युक्तायुक्तविचक्षणा विवेकिन इत्यर्थः।

एवं संपत्तौ च विपत्तौ च विकार मनापन्नाः महान्तः राम - हरिश्चन्द्राऽऽदयो लोकसन्नुता बहवः पुराणादिषु श्रूयन्ते। प्रकृते हरिश्चन्द्रकथाऽत्र प्रस्तूयते।

हरिश्चन्द्रो नाम धार्मिकः सत्यशीलो राजा आसीत्। सम्पत्तावप्येष नैवामाद्यत। न कदाऽपि सत्यात् धर्माच्च अतिक्रान्तं तस्य चित्तम्। विश्वामित्रः राजर्षे रस्य सत्य-निष्ठां विश्लथयितुं बहुधा प्रायतत। प्रथमत एनं राज्या-न्निष्कासयामास। सभार्यापुत्रस्यास्य बहुळायासप्रायं वनवासं विदधौ। तत्र निराहारस्थिति मपि कल्पयामास। भार्यापुत्रौ च विक्रापयामास। अन्ते च राज्ञोऽपि तस्य पराधीनवृत्ति नीचसेवां च कल्पयामास। तथाप्ययं राजा कूटस्थ इव अविचलितः सत्यनिष्ठः आदर्शप्रायश्च तस्थौ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्रायं विशेषः। विश्वामित्र श्चेत्परीक्षां नाकरिष्यत् तस्य राज्ञः विशुद्धा सत्यनिरतिः नोदगमिष्यत्; स राजा लोकप्रसिद्धिं च नाभजिष्यत। अतः आपदोऽपि भङ्ग्यन्तरेण महान्तमुपकारं कुर्वन्ति। आत्मन उत्तमगुणान् बहुमुखं प्रकटीकृत्य महतीं कीर्तिमावहन्ति।

सम्पत्तयश्च बहुविधा उदाह्रियन्ते। यथा विद्या-विनय-विवेक-सम्पत्तिः, शम-दमाऽऽदि गुणसम्पत्तिः, पशु-पुत्र-धनाऽऽदि-सम्पत्ति रित्यादि। सर्वा अप्येता श्श्रेयो विदधति। किन्तु इतरेतराश्रयमूला स्सत्य एव शोभन्ते। तथाहि :— बहुधा विद्यासम्पद्भिर्लसितोऽपि विनय - विवेक-सम्पद्भिरहितः विद्याफलं नैव भुनक्ति। अप्रतिष्ठश्च दुःखा न्यनुभवति। विशालकुलसम्पन्नाः पशुपुत्रधनादि-सम्पन्महिता अपि विद्या - विनय - विवेकरहितास्तु निर्गन्धाः किंशुका इव न शोभन्ते। किञ्च सत्यामपि तपस्सम्पत्तौ शमदमाऽऽदिगुणसम्पद्विहीनाः सन्तः बहुधा विप्रकृष्टचित्ता भूत्वा तपःफलं नैवाऽऽदातुं प्रभवन्ति। एवञ्च सर्वापेक्षया विद्याविनय - विवेक - शमदमाऽऽदिगुण सम्पत्तयः अत्यन्तं प्रधानाभूता इति लक्ष्यते। अन्यथा विद्याऽऽदिसम्पत्तिदूराः अन्या स्सर्वा स्सम्पदः आपदामेव मूलम्। आपदश्चाग्निपरीक्षाकल्पा इत्युक्तमेव। तां च परीक्षां उत्तरितुं विद्याविनय - विवेकाऽऽदिगुणसम्पत्तय एव शरण मस्माकम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अतः सम्पत्तौ च विपत्तौ च एकरूपतां प्राप्तुं महानुभावतां चाऽऽधातुं सर्वैः विद्या - विनय - विवेक - शम-दमाऽऽदिगुणसम्पत्ति रवश्यं अनुसरणीया भवन्ति ।

नहि कृतमुपकारं साधवो विस्मरन्ति

लेखकः – कू. चन्द्रशेखरशर्मा, B: A. संस्कृतान्ध्राध्यापकः

लोकेऽस्मिन् साधवः असाधवः इति द्विविधा वर्तन्ते जनाः। सद्गुणविशिष्टाः सत्पुरुषाः साधवः, दुर्गुणसहिताः पुरुषाः असाधवः ।

दुर्जनाः विनैव कारणं इतरान् पीडयन्ति, विनाकारणं अपकारं कर्तुं मिच्छन्ति । अयमेतेषां स्वभावः । अत एव 'निकृतिप्रिया हि नीचाः' इति सूक्तम् । उपकृता अपि ते उपकृतिं विस्मरन्ति, प्रत्युत अपकारकरणे न सन्दिहन्ते ।

किन्तु साधवः पुरुषाः सदा सन्मार्गगामिनः इतरेषां न हानिं कुर्वन्ति, किन्च उपकारका भवन्ति। अयाचिता एव उपकुर्वते । तेषां संपदः परोपकारायैव भवन्ति । तदुक्तं —

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः परोपकाराय सतां विभूतयः॥

इति वृक्षाः नद्यः, गावः अपि विना याचनां परोपकारं कुर्वन्तीत्युक्तौ कः सन्देह स्सज्जनानां मानवानां विषये? अपि च ते साधवः कृतं उपकारं स्वल्पमपि न कदाऽपि विस्मरन्ति, विशिष्य अपकारकारिणे उपकारमेव कुर्वन्ति। अयमेषां विशिष्टो गुणः, यत् परकृत मुपकार मल्प मप्यनल्पं सम्भाव्य सभामुखे कृतज्ञतां प्रकटयन्ति। स्वकृतं महान्तमप्युपकारं प्रसङ्गवशेनापि नोद्घाटयन्ति यतस्ते नानुमन्यन्ते आत्मश्लाघाम्। सज्जनानां दृष्टिः सुविशाला। प्रपञ्चजनता मेककुटुम्बत्वेन ते सम्भावयन्ति। धर्मराज इव अजातशत्रव स्ते स्वपरभेदमुत्सृज्य सतत मुपकारकारिणो भवन्ति। अन्यैः उपकृताः साधवः स्वार्थ-मप्यविगणय्य आमरणं तस्योपकारका जीवितं यापयन्ति। अस्मिन् विषये साधुजनस्वभावः बहुधा उपवर्णितः अस्माकं पुराणेतिहासकाव्येषु। अस्य उदाहरणानि भारतीयनीति निक्षेपभूते श्रीमन्महाभारतेतिहासे रामायणे उपलभ्यन्ते।

महाभारते प्रसिद्धः कर्णः यद्यपि कुन्तीपुत्रः, तथाऽपि पांडवेषु न गण्यते। विवाहात् पूर्वं कुन्तीं दूर्वाससः महर्षेः कतिचन मन्त्रानधिगत्य एकदा भगवन्त मादित्यं मन्त्रबलेन आहूतवती। भगवान् सूर्यः समागत्य तस्याः पुरतः प्राह

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'कन्ये किं त्वं वाञ्छसि' इति। किमपि प्रष्टुमजानन्ती सा अवोचत् 'त्वत्समं पुत्रम्' इति। सूर्यः प्रसन्नः 'तथाऽस्तु' इत्यवादीत् सद्य एव सा सुन्दरं कुमारं सुषुवे। तं दृष्ट्वा संतुष्टाऽपि सा लोकापवादभयेन शिशुं पेटिकायां निक्षिप्य गङ्गायां तत्याज। स बालकः प्रवाहेण सुदूरं नीतः धृतराष्ट्रस्य सारथिना 'अधिरथ' नामकेन दृष्टः स्वगृहं प्रापितः। अनपत्या तस्य जाया राधा तं प्रेमातिशयेन पोषयामास। स एव 'कर्ण' इति प्रसिद्धः।

एष कर्णः दुर्योधनेन आदृतः अङ्गराज्ये अभिषिक्तः। एवं उपकृतः कर्णः सुयोधनस्य कृतज्ञो भूत्वा स्वप्राणानपि अर्पितवान् युद्धे।

श्रीकृष्णः तं पांडवपक्षे समाक्रष्टुं सुमहत्प्रयत्न मकरोत्। तज्जन्मरहस्य मखिल मुपवर्ण्य कृष्णः कुरुराज्याभिषेकाऽऽदिभिः बहुधा तं लोभयामास। सर्वं जन्मवृत्तान्तं श्रुत्वाऽपि कर्णः न चचाल। राधाऽधिरथावेव स्वपितरौ भावयन् कृतं उपकारं अविस्मृत्य मित्रं दुर्योधन मनुससार। साधुः कर्णः दुर्योधनस्य उपकारं संस्मृत्य संपदं अधिकारं च तृणीकृतवान्।

एवमेव रामायणे वालिना निष्कासितः सुग्रीवः ऋष्यमूकपर्वते अटन् सीताऽन्वेषणपरं श्रीरामं सलक्ष्मण

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मपश्यत् । सोदरं वालिनं हन्तुकामः सः रामस्य सहायं प्रार्थयत। तस्य प्रार्थनां अङ्गीकृत्य रामः वालिन मवधीत्। इत्थं श्रीरामेण उपकृतः सुग्रीवः तस्य कृतज्ञः अभवत् । ततः सीतान्वेषणे, रावणवधे च रामस्य सहायको भूत्वा सुग्रीवः एवं स्वकृतज्ञतां निवेदितवान् ।

एवमेव साधुजनाः कृतमुपकारं न कदाऽपि विस्मरन्ति । एतादृशानां साधूनां संख्या अत्यल्पा अस्ति । तेऽपि सामान्यजनवत् प्रवर्तन्ते । किन्तु विशिष्टगुणैः भूषिता दृश्यते । लवणस्य कर्पूरस्य च वर्णः समान. किंतु आस्वादेन तयोः भेदः यथाऽवगम्यते तथैव पुरुषेषु पुण्यपुरुषाः साधवः ज्ञायते । अपितु न शक्यं वक्तुं साधुजनाः सर्वत्र स्युरिति । कुत इति चेत् —

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो नहि सर्वत्र चन्दनं न वने वने ॥

यद्यपि माणिक्यस्य उत्पत्तिः पर्वते एव भवति तथाऽपि तन्नभवति प्रतिपर्वतम् । तथैव मुक्ताः केषुचिदेव गजेषु स्युः । चन्दनमपि प्रतिवनं स्यादिति वक्तुं न शक्यम् । एवंप्रकारेण साधवोऽपि सर्वत्र नोपलभ्यन्ते । यतः अनर्घस्य वस्तुतः उत्पत्तिः विरला खलु ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जन्तुष्वपि केचन साधवः संति। ते कृतं उपकारं न विस्मरन्ति। स्वल्पाहारदानेनापि शुनकः सदा कृतज्ञः यजमानस्य विश्वासपात्रं भवति।

इत्थं साधवः मानवाः, पशुपक्ष्यादयश्च
कृत मुपकारं न विस्मरन्ति।

गुणवद्वस्तुसंसर्गा द्याति स्वल्पोऽपि गौरवम्

साहित्यशिरोमणि - धर्मपुरि शेषगिरिशर्मा,
संस्कृताध्यापकः

स्वयमल्पीयानपि पदार्थः जीवो वा गुणवतः महिमोपेतस्य वस्तुनः संसर्गात् सम्बन्धवशात् गौरवं याति महत्त्वं प्राप्नोतीत्यर्थः। गुणहीनमपि द्रव्यं गुणवतो द्रव्यस्य सम्बन्धेन महिमानं भजत इति निर्गळितोऽर्थः। अयं हि विषयः जडेषु, तिर्यक्षुः, चेतनेष्वपि प्रत्यक्षं दृश्यते। यथा — 'पुष्पमालाऽनुषङ्गेण सूत्रं शिरसि धार्यते' इति, 'अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः' इति वा पूर्वोक्तस्य पूरणांशः।

तथाहि — कार्पासस्तन्तुः स्वयं प्रियदर्शनो न भवति, अतस्तं न काऽपि कण्ठे, शिरसि वा धारयति। किन्तु स

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एव तन्तुः पुष्पाणां मालाग्रथनकरणं भूत्वा तेषां सम्बन्धेन स्वयमपि तैस्सह कण्ठे, शिरसि, हस्तयोर्वा ध्रियते, त हृदयहारिषु कामिनीजनचिकुरेषु देवताविग्रहेषु चाल यते, किं बहुना वासुदेवभूषिता वनमालाऽपि सूत्रसम्ब नैव प्राधान्य मुपगता। एव जडभूता शिलाऽपि मन्त्रविद्भि-र्महात्मभिः शास्त्रविधिना प्रतिष्ठिता सती, पूजनीयतां प्राप्नोति। तथा पूजकानां मनोरथमपि पूरयति, स्वप्ने देवतारूपेण साक्षात्क्रियते, कदाचि ज्जाग्रदवस्थाया मपि भगवद्रूपेण दृश्यते। शिलायां सन्निहितोऽय मलौकिक-सामान्यो महिमा मन्त्रवित्प्रतिष्ठितभगवत्संसर्गेणैव सञ्जात इति निश्चप्रचम्। जपाकुसुमसान्निध्येन स्फटिकमणिः पद्मरागतां भजते।

अत्रेद मवधेयम्। गुणवत स्संसर्गेण यथाऽल्पस्य महत्त्वं, एवं दोषवत स्संसर्गेण महतोऽल्पत्वमपि संक्रामति। अत एव 'संसर्गजा दोषगुणा भवन्ति' इति वृद्धा आमनन्ति। तथा हि — जगत्त्रयपवित्रीकरणपटुः पावकः लोहसंसर्गं प्राप्य मुद्गरै र्हन्यते। रविकिरणसंयोगजन्यसन्तापशमन-दक्ष श्चन्दनतरुः यद्यप्यातपसन्तप्ता नाकर्षति अथाऽपि दुस्सह-विषपूरितरसनावता भुजगेन परिवेष्टितः दूरादेव परि-ह्रीयते। अयं हि दुष्टसंसर्गपरिणाम इत्यनुक्तमपि ज्ञायते। किञ्च सुकविकर कमलसंलग्नलेखिनीसंसर्गं प्राप्य-

3

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मषी रामकथानिर्माणपुण्यकार्यं तनोति। सैव कुकविकर-संबद्धा पापकथां निबध्नाति। अपि च भगवद्गुणश्रवण-प्रवणस्य भक्तजनस्य सङ्गतिं प्राप्य कीरशेखरः रामनामो-च्चारणेन सुखयत्यन्तिकस्थं जनम्। दुर्जनपरिपालित स्स एव शुको दुरालापै स्सन्तापयति। नलिनीदळसंस्थितो जललवः मुक्तामणिश्रियं दधाति, स एव मृदि शिलायां वा पतित नामरूपे जहाति। अत्र विषये विचारणींया अन्येऽपि विशेषा विद्यन्ते। यथा —

लोके क्षामसूचको मूषकः धान्याऽदिभक्षणेन पटाऽऽदि खण्डनेन च गृहस्थान् क्लेशयति। अथापि तेषां प्रभो र्भगवतो गणाधिपस्य, करुणाळोः विघ्नाद्रिभेदकुशलस्य वाहनं भूत्वा जनै राराध्यते। अयञ्च बहुमानः महतो भूतस्य संसर्गसम्भूतो विशेष इति नाऽविदतम्। किञ्च मारणास्त्र मिव जनै र्भयविह्वलदृष्टिभि स्सुदूरं परिहीय-माणः फणी जगत्पितु श्शङ्करस्य भूषणतां प्राप्य जनता-घनतापहर इति मुक्तकण्ठं स्तूयते। सर्पाशनो गरुत्मानपि गोविन्दचरणारविन्दसंसेवनेन अतिलोकमहिमानं प्राप्य जीव-लोकेन संस्तूयते।

प्राकृताः गो - गोप - गोपाङ्गनाः अप्राकृतदिव्य-मङ्गलविग्रहस्य शतकोटिमन्मथसुन्दरस्य घनश्यामस्य मुरलीमञ्जुसिञ्जानसम्मोहितव्रजबृन्दस्य वसुदेवनन्दनस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

करुणाकटाक्षसंसर्गेण सम्मान्यता मभजन्त। इदं हि सर्वविदितं यत् - प्रह्लादो विभीषणश्च पिशिताशनकुले जज्ञतुरिति। अथाप्येकः कल्याणगुणाऽऽकरस्य करुणामयस्य जगदवनक्षमस्य नारायणस्य गुणकीर्तनसंबन्धेन, अन्यः विभीषणः मूर्तिमतो धर्मस्य सर्वभूतसंरक्षकस्य साकेतपुराधीश्वरस्य श्रीरामचन्द्रस्य समाश्रयणसम्बन्धेन च निखिलजगज्जेगीयमानपुण्यचरितौ, भक्तकुलालङ्कारौ बभूवतुः। पशुगणप्रविष्ट स्स्वभावचपलः हनुमान् कपिरपि भगवद्गुणानुरागसंबन्धेन देवत्व मलभत। श्रीरामपादरजस्सङ्गेन अहल्या शिलाऽपि चैतन्य मवाप। अयःखण्डोऽपि पारदस्पर्शेन सुवर्णता मधिगच्छति। गोदुग्ध मप्याम्लसंबन्धेन वैरूप्यं प्राप्य दधि भवति।

एवं विधै रनेकै र्दृष्टान्तै स्सुदृढ मवगम्यते – यत् – संसर्गवशाद् गुणो दोषो वा संक्रामतीति। अतः सर्वप्रयत्नेन सज्जनसङ्गतिं सम्पाद्य जनाः आत्मनो योगं क्षेमञ्च भजेयुः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अश्नुते हि स कल्याणं —
व्यसने यो न मुह्यति

— चि. मा. वेङ्कटराघवाचार्यः, वाराणसी.

उष्णरश्मि र्मन्दकिरणः मन्दम्मन्दं अस्ताचलं प्रविशन्नस्ति। पक्षिण स्स्वकुलायान् प्रविशन्ति, पशव स्सवत्सा स्साग्रं गृहान् परावर्तन्ते, कन्दर्पः कामुका न्बाधितु मारभते। सुधांशुरपि कामिनीमनांसि ह्लादयन् मन्द मभिवर्धते। उद्यानवाटिकायां कस्यांचि द्वेदिकायां उपविश्य किमपि विचिन्तयन्तीं काशीराजकुमारीं स्वसख्या संलपन्तीं मृगयार्थमागतः कश्चन राजकुमारोऽद्राक्षीत्। आगत्य स राजकुमारः निकषा वेदिकां, तां सखी मपृच्छत्। "भोः केयं राजकुमारी? सौन्दर्यनिर्जितरतिः, चन्द्र वदना, बिम्बफलाधरा, कम्बुकण्ठी, मृदुपाणिपल्लवा, अलक्तकालंकृतचरणारविन्दा, निराधारा वल्लरीव विजनेऽस्मि न्नुद्याने किमपि विचिन्तयन्ती उपविष्टा वर्तते" इति। तदा सखी प्रतिवक्तुमारेभे। अनयो स्सल्लापं आकर्ण्य राजकुमारी सखी माहूय, 'कमले! किमयं पर-पुरुषेण सस्मितः सल्लापः। अपसर तस्मात्प्रदेशात्' इति। तदाकर्ण्य सखी राजकुमारोदन्तं राजकुमार्यै न्यवेदयत्। तदा राजकुमारी मिथो राजकुमारेण सह सल्लापमिच्छन्ती

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सखी माहूय 'सखि! पिपासा मां भृशं बाधते। समीपस्थां दीर्घिकां गत्वा जलमाहर' इत्यवोचत्। तदाकर्ण्य सखी राजकुमारीं दृष्ट्वा 'मिळितो नागरिकस्ते साधयेप्सितम्। नाहमत्र स्थातु मुत्सहे' इत्युक्त्वा निष्क्रान्ता। गतवत्यां सख्यां राजकुमारी तं राजकुमारं वीक्ष्य किञ्चिन्मन्दस्मिता लज्जाऽवनताऽऽनना न किञ्चिदूचे। राजकुमारः, तां दृष्ट्वा, बाले! त्वन्मुखपङ्कजं वीक्ष्य मन्मनस्त्वय्येव लग्नम्। का त्वं? कुतोऽत्र निवससि?' इति पप्रच्छ। तदाकर्ण्य राजकुमारी सञ्जातरोमाञ्चा प्रत्यवादीत्। 'राज-कुमार! काशीराजकन्याऽहं सुजातेति नाम्ना विख्याता सख्या सह वनविहारार्थ मागताऽस्मि। भवान् राजकुमारोपि सन् यौवने वयसि राज्यादिकं परित्यज्य वने विहरन् करकमलधृतचापः कन्दर्पदर्पहरदिव्यदेहः आजानुबाहुः देशमिमं कुतोलञ्चकार, कस्य वा भवान् पुत्ररत्नं, मद्भाग्यवशा त्तत्रभवान्' इत्यर्धोक्ते लज्जया विरमति। श्रुत्वेमां तद्वार्तां अमृतसागरान्तर्निमग्न इव सरोमाञ्चः किञ्चिदिव विवक्षुः आसीत्। तावदेव कश्चन पञ्चास्यः अनयो स्समीपं गर्जन्नेवाऽगात्। राजकुमारी दृष्ट्वा तं मृगेन्द्रं कुररीव क्रोशन्ती समीपस्थं क्रीडागृहं धावति स्म। राजकुमारस्तु धनुषि सायकं सन्धाय केसरिणं हन्तुं तमनु-धावन् सुदूरं गत्वा तं हरिं जघान। तत्र शत्रुभूपालै-न्यपरिवृतः कुमारमेनं ग्रहीतुं सन्नद्ध आसीत्। भूपोसौ

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजकुमारमेनं सिंहव्यापादनव्यापृतं स्वसैन्यैरानाय्य स्वभवनं ययौ। राजकुमारी तु सिंहानुगं राजकुमारं अदृष्ट्वा शोकाक्रान्ता पुनर्धैर्यं मवलम्ब्य तद्राजकुमारान्वेषणे कृतनिश्चया आसीत्। तदा चारमुखा दुदन्तं सर्वं विदित्वा सख्या साकं शत्रुराजधानी मगमत्। गत्वा तत्र सा वैद्यवृत्ति मवलम्ब्य रोगिणो बहून् मूलिकाऽऽदिदानेन निरामयान् कुर्वन्ती तस्मिन्नगरे महतीं कीर्तिं सम्पादयामास। एकदा, तद्देशधिपस्य पत्नी रोगार्ताऽऽसीत्। स राजा वैद्यरूपां राजकुमारी मिमा मानाय्य स्वभार्याया रोगनिदान मपृच्छत्। सा तस्या रोगनिदानं ज्ञात्वा, राजान मेव मवादीत्, 'राजन्! मह्यमेकं अभीप्सितं वरं अर्धराज्यञ्च भवान् प्रयच्छतु। तव महिषीमिमां शान्तरोगां करिष्यामि' इति। श्रुत्वा तद्वाक्यं स राजा तथेति प्रतिज्ञामकरोत्। राजकुमारी तु तां औषधदानेन मुक्तरोगां कृत्वा राजानमेवमाह। "भवन्निकटे कश्चन राजकुमारः त्वया वनान्नीतोऽस्ति। स सत्वरं त्वया विसर्जनीयः, मे दातव्य मर्धराज्यञ्चेति।" तदा स्वप्रतिज्ञाऽनुसारं राजा राजकुमारं मुमोच, अर्धराज्यञ्च तस्यै प्रादात्। सुजाता राजकुमारी तं राजकुमारं अर्धराज्यञ्च लब्ध्वा स्वपितरमाहूय क्षात्रेण धर्मेण तमुपयेमे। तौ दम्पती साम्राज्ये पट्टाभि-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

षिक्तौ च बभूवतुः। राजकुमारी व्यसन मविगणय्य सुखेनाऽऽसीत्। अत एवोच्यते 'अश्नुते हि स कल्याणं व्यसने यो न मुह्यति' इति।

न संशयमनारुह्य नरो भद्राणि पश्यति

न्यायविद्याप्रवीणः, भाषाप्रवीणः
वाविलाल वेङ्कटेश्वरशास्त्री

संशयं प्राप्तस्य जनस्य कदापि नकश्चन निर्णयो भवति। न तस्य भद्राणि भवन्ति च। स्थाणुपुरुषयो रन्यतरं दृष्ट्वा अयं स्थाणुर्वा पुरुषो वेति प्रथमत स्सन्देहे ततो विशेषतो विज्ञाय स्थाणुरेवायम्, अथवा पुरुष एवाय मिति निश्चिनोति। तादृशनिश्चयस्य न कदाऽपि क्षतिः। यः मौढ्येन प्रथमत स्संशय मापद्यते स निर्णयं न करोति भद्राणि च न पश्यति। अनुभूयमानेषु विषयेषु सर्वत्र सामान्यत स्संदेह एव शीर्षमधिरोहति। 'लभ्यते वा न वेति तत स्संशयं विहाय एकपक्षव्यवस्था मवलम्ब्य विषय मवाप्य सुखी वर्तते। यावज्जीवं संशयग्रस्तः सुखं न प्राप्नोति। "संशयात्मा विनश्यती"ति वाक्यस्याय-मेवाभिप्रायः। यावज्जीवं संशयापन्नस्य नाश एव भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत एव सर्वेणाप्यन्ततो गत्वा कृतनिर्णयेन भाव्यमिति न्यायविदां सरणिः। निर्णयतीरमप्राप्तस्य संशयप्रवाह-पतितस्य नाश एव भवतीत्युक्तिः न साहसिकी।

लौकिकेषु वैदिकेषु च वाङ्मयेषु निर्णयानुकूल स्संशयः ज्ञानप्राप्तिहेतुरिति बहुधा दृश्यते तत्रतत्र। प्रष्टु-स्संशयो नस्याद्यदि तर्हि न तस्य प्रश्नावकाशोऽस्ति। तद्वोपदेष्टुरन्तिकं गत्वा न पृच्छत्येव। उपदेष्टाच तं कथं छिन्नसंशयं करोति? अत एव संशयविच्छेदाय संश्रय आश्रयणीयः इत्यत्र नकापि विप्रतिपत्तिः। निर्णयानुकूल स्संशय स्सुखाय भवतीत्यत्रानुभव एव प्रधानपद मधि-रोहति, किं बहुना। हैन्दवानां स्वातन्त्र्यसम्पादने श्वेत-मुखानाञ्चापसरणे पूर्वं गान्धि स्संशयो बभूव। लवण-सत्याग्रहादिभ्यः श्वेतमुखान् कथं जेष्यामः, कथञ्च स्वातन्त्र्यं समुपार्जयाम इति कांग्रेस्नायका स्सर्वेपि सन्देह-ग्रस्ता बभूवुः। तदा लोक मभित स्संशयाधकार स्समा-वृणोत्। तत स्सर्वे मिळित्वा कञ्चन निर्णय मवाप्य केनचित् प्रयतनेन स्वातन्त्र्यं समुपार्जितवन्तः ततो भारतदेश श्शुभोदर्कोऽभूत्।

स्वीयोद्यमारम्भे सर्वोपि जनः अग्रे संशयाविष्टो भवति। संशयप्राप्तिः सर्वस्य सहजेति दृश्यते। पश्चात् कार्यंनिर्णयं कृत्वा कृतयत्नः सफलमनोरथो भवति। यदि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नित्यशङ्कितस्स्यात् तर्हि दुःखभाग् भवतीत्यत्र न सन्देहलेशोपि । निर्णयाननुकूल स्संशयः दुःखाय भवतीति अनुभवविदितः । निराधारोपि संशयः दुरन्तः मनुजं भ्रामयतीति दृष्टान्ततया सम्मता न्यनेकानि पूर्वचरितानि सन्ति । निर्णयासमर्थः संशयग्रस्तश्चेत् तस्य कष्टपरम्परा भविष्यति । तस्मात् निर्णयसमर्थेन संशयग्रस्तेन पुरुषेण भाव्यमिति बुद्धिमतां रीतिः । संशयोत्तरनिर्णयः कार्यसाधनो भवति । महात्मनामपि प्रथमत स्संशय एव भवतीत्यत्र दुष्यन्तचरितमेव निदर्शनम् । कण्वाश्रमे शकुन्तलां दृष्ट्वा दुष्यन्तः प्रथमं ऋषिकन्यका वा न वेति संशयाविष्टचित्तो बभूव । अनिर्वर्णनीयं परकळत्र मिति च शकुन्तलाविमुखोऽभूत् । ततः कैश्चित् हेतुभिः क्षत्रपरिग्रह-क्षमेति निर्णीय तत स्तस्याः प्राप्तौ कृतयत्नः बभूव। संशयानन्तरं जायमानो निर्णयः कार्यं साधयतीत्यत्र दुष्यन्तस्य यतनमेव प्रमाणतमम् । सन्देहविषयेषु वस्तुषु सत्पुरुषाणां बुद्धिप्रवृत्तय एव प्रमाणमिति निश्चित्य दुष्यन्तः प्रववृते । वैदिकवाङ्मयेपि कठोपनिषदि "येयं प्रेते विचकित्सा मनुष्ये अस्ती त्येके नाय मस्तीति चैके" इत्यत्र आत्मनि अस्तित्व नास्तित्वसंशयः नचिकेतसः समजनि । संशयोत्तरं तेन यमः पृष्टस्सन् अस्तीत्येवात्मेति निर्णयं चकार । ततश्च विद्यया प्राप्तात्मलाभः सन् नचिकेताः संसारसागरात् उत्तीर्णोभवत् । महान्तं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लाभ मन्वभूच्च । यदि संशयो न स्यात् तर्हि न पृच्छत्येव यम मात्मान मुद्दिश्य यदि अपृष्टश्चेत् यमः "नापृष्टः किञ्चि दब्रूयात्" इति न्याय मनुसृत्य न किञ्चिदपि वक्ति। कथं आत्मलाभस्तु नचिकेतसः सम्प्राप्त एव स्यात्? ततः संशयोत्तरं तत्वजिज्ञासुः तत्व मपृच्छत् । तदनन्तरं निस्संशय मुक्तः संशयोत्तरजनितेन निर्णयेन निष्कासित-सशयः आत्मलाभ मवाप्नोत् ।

तस्मात् लौकिके च वैदिके च मार्गे एतादृशी सरणिः दरीदृश्यते । संशयमारुह्य एव नरः भद्राणि पश्यतीति लोकोक्तिः । तदुक्तिरेव यदि यावज्जीवं संशयापन्नस्य नाश एव शिष्यते इत्युक्ति स्सुसमीचीना । यस्य मनः कस्मैचि न्निर्णयाय सन्देहास्पदं भवति तस्य महान् लाभः इति सार्वजनीन मेतत् । तस्मात् सर्वैरपि संशयपूर्वक-प्रश्नप्रतिवचनैः यत्किञ्चिदपि कार्यं साधनीयमिति फलितम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center.

नीचैर्गच्छ त्युपरि च दशा चक्रनेमिक्रमेण

— वेम्पराल सूर्यनारायणशास्त्री

यथा चक्रस्य नेमि रधस्तादुपरि च यानकाले भ्रमति, तथा जीवितकाले प्राणिनां दशाऽपि भ्राम्यति। अतः "दुःखं वा सुखं वा न नियतं देहिना"मिति लोकज्ञः कालिदासमहाकवि र्यक्षमुखेन मेघसन्देशे काव्ये सार्वकालिकं सत्यमुज्जुघोष। प्राणिनां जन्मान्तरीय - सुकृत - दुष्कृत-वशा त्तत्तद्युक्तकाले तैः सुखरूपं, दुःखरूपं फलमनुभाव्यं भवति। 'लोके यः कश्चिदपि सर्वदा न सुखी सर्वदा नापि च दुःखीति निश्चप्रचं' एत दविज्ञाय, ज्ञात्वाऽपि च सुख मनुभवितुं दुखं निराकर्तुं देहिनो वृथा यतन्ते। अहो! दुःखमये जगति रुद न्नाविर्भूय, दुःखं त्यक्तुं, अलभ्यं सुख माप्तुं च प्राणिवर्गो मूढो यतते। दुःखस्य दुर्भरत्वा त्तन्निरासयत्न स्समुचित एव। स्वहस्तगत इव सुखे अभिलाषः कथमिति चेत् "देही स्वत आनन्दमयः परमात्मैव। सुखस्वरूपस्य देहिनः (जीवस्य) तदभिलाषः सहज एव। तथाऽप्यज्ञानावृतो देही देहाभिमान मवाप्य, निजस्वरूपं विस्मृत्य बहिर्दृश्यमानानि, मरुमरीचिका-सदृशानि सुखा न्यभिलषन्, विपरीतफलप्राप्त्या द्विगुणीकृतं दुःखमेवानुभवति" इति तत्त्वविदो वदन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एत न्मनसि कृत्वा काळिदासमहाकविना "कस्यै-कान्तं फलमुपनतं दु:ख मेकान्ततो वा" इत्युक्तम् ।

तत्काव्यनायको यक्षो रामगिरिप्रवासात्पूर्वं मपूर्वान् भोगान् बुभुजे। प्रभुणा शप्तः शून्ये गिरा वेकाकी विचरति। तत्प्रवास एकवत्सर मित एव, न तु याव-ज्जीवमिति जानन्नपि स्वगृहे वसन्ती दयिता स्ववियोग मसहमाना मरिष्यति" इति बिभ्यन्, "मासचतुष्टयं लोचने मीलयित्वा यापय। अनन्तर मावयो स्संगति रवश्यं-भाविनी, पुनरावां सुखमनुभविष्याव" इति मेघं दूतीकृत्य संदिशति ।

इत्थं मेघमुखेन वक्तुं तस्य महाकवेः वाल्मीकि व्यासाऽऽदिमुनिभिः पुराणेषूपनिबद्धाः गाथा एव प्रमाणं बभूवुः। नल – राम – युधिष्ठिराऽदयो महात्मानः जीवितकालेऽल्पं सुख मनल्पं च दुःख मन्वभवन्निति ज्ञायते। इदानीमपि ये महात्मानः ते स्वधर्मदीक्षिता स्सुखादप्यधिक-तरं दुःखमेवानुभूय, शाश्वतिकीं कीर्ति मलभन्त, लभन्ते च। ये केचन आदौ स्वधर्मे तत्परा अपि, दुःखातिशये प्राप्ते स्वधर्मं परित्यजन्ति, तेऽयशसः पात्राणि भवन्ति। अव-शिष्टजनाः स्वधर्मवार्तामप्यजानन्तो यशो वाऽपयशो वा अलभमानाः क्रिमिकीटपश्वादिरिव, लोके उद्भूय अप्रसिद्धा म्रियन्ते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रीरामः शैशवात्प्रभृति यौवराज्याभिषेकसङ्कल्पपर्यन्तं स्वप्नेऽपि दुःखलेशमजानन्, स्वयं विष्णोः अवतारभूतोऽपि सीतालक्ष्मणाभ्यां सह महावने वसन् कीदृशं सुख मलभत? सीतावियोगकाले तदीयदुःखदर्शां दृष्ट्वा शिला अपि रुरुदुरिति भवभूतिना वर्णितमुत्तररामचरिते। रावणवधानन्तरं कञ्चित्कालं निनायायोध्यायां सुखेन। पुनः सीतात्यागेन महद्दुःख मेवाऽनुबभूव। विचार्यमाणे — "आदौ तस्य दशा उन्नतकोटि मधिगत्यापि अन्तराऽन्तरा नीचैः कोटिं प्राप्नुवन्ती पुनः शिरस्पदं पुन रधस्पदं याता" इति स्फुटमेव खलु। "जगदिदं सर्वदा सुखदुःखात्मक" मित्यस्मादृशां जन्तूनामुपदेष्टुं भगवान् रामरूपेण मर्त्यलोकेऽवतीर्य स्वय मनुभूयेव सुखदुःखे अभिनीतवा" निति प्राज्ञा भणन्ति।

इत्थं सत्यवाक्यपरिपालनाय हरिश्चन्द्रो, नलश्च महतः क्लेशा नन्वभूताम्। युधिष्ठिरोऽपि स्वधर्म मपरिहरन् सुखादत्यधिकं दुःख मेवाऽन्वभवत्। राज्यलक्ष्मीप्राप्त्यनन्तरं सुखमाप दुःखमिश्रम्।

तस्मात् सुखदुःखयो र्भ्रमणं नियतमिति विज्ञाय, धीरै र्दुःखनिरासार्थं वा सुखावाप्तये वा न यतितव्यम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

"सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुख"मिति हि सूक्तिः। एतत्सत्यमेव। काळिदासेन 'कस्यैकान्तं सुखमुपनतं दुःख मेकान्ततो वा' इति प्रश्नपूर्वकं 'नीचै र्गच्छतीति' दृष्टान्तेन स्फुटीक्रियते स्म।

जीवन् भद्राणि पश्यति

— उडालि सुब्बरामशास्त्री

जीवनधारणम् – कल्याणप्राप्तिः – जीवनस्य – अमूल्यत्वम् – तस्य सदुपयोगः – आत्महत्याऽऽदीन् – दोषहेतुत्वम् – जीवनरक्षणप्रकारः — इत्ययं शीर्षकार्थस्य स्थूलो विभागः।

जीवनं रक्षतो मनुष्यस्य शुभप्राप्तिरिह सम्भाव्यते। इत्थमापाततः परिशीलने शीर्षकमिदं सरलार्थमेव। तथाऽपि सूक्ष्मदृष्ट्या पर्यालोचने गम्भीरार्थस्फोरकं प्रतिभाति। अयं च श्लोकभागः श्रीमद्रामायणे सुन्दरकाण्डे दृश्यते।

विनाशे बहवो दोषाः जीवन् भद्राणि पश्यति।
तस्मात् प्राणान् धरिष्यामि ध्रुवो जीवति सङ्गमः॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति समग्रः श्लोकः। लङ्कायां सीतादेवीमन्विष्य तस्या अदर्शनेन चिन्ताऽऽकुलस्य हनुमतो मुखादयं श्लोको विनिर्गतः। सीतान्वेषणाय समुद्रतरण - लङ्काप्रवेशादिक मतिसाहसकृत्यं हनुमता कृतम्। तथाऽपि सीतादर्शन-रूपफलप्राप्तिस्तु तस्य प्रथमतो नाऽऽसीत्। तेन निर्विण्णोऽय मन्यत्कर्तव्य मपश्यन् प्राणत्यागार्थं कृतनिश्चयोऽभूत् तस्या-मतिक्लिष्टदशायां किमप्याशाज्योतिः तस्मिन् समुन्मिषितम्। येन च मरणोद्यमात् विरतः प्रसन्नहृदयः नीतिसूक्तिमिमां स्मरति। आर्यधर्मैकनिलये श्रीमद्रामायणे तावदीदृशानि सूक्तिरत्नानि बहूनि दृश्यन्ते। हनुम-त्सन्देशप्रभावा दुद्बन्धनात् विरता, कमप्यभिनव मुल्लास मनुभवन्ती सीताजननी यदा हनुमता सह सम्भाषितु मुपचक्रमे तदा भगवान् वाल्मीकिः —

कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे।
एति जीवन्त मानन्दो नरं वर्षशतादपि॥

इति कामपि महितार्थगर्भां नीतिं प्रावर्तयत्। नीतिरियं शीर्षकस्यास्य विवरणप्रायैव। तथा च सीतायाः हनुमतः, तथा भगवतः श्रीरामचन्द्रस्य च चरितं सूक्तिरियं लक्षीकरोति। इत्थं परश्शतानि नीतिवचनानि तत्र तत्र संलक्ष्यन्ते — "कालक्रमेण जगतः परिवर्तमाना चक्रार-पंक्तिरिव गच्छति भाग्यपंक्तिः।" "कस्याऽप्यन्तं सुख

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मुपनतं दुःखमप्यन्ततो वा" "नीचै र्गच्छ त्युपरि च दशा चक्रनेमिक्रमेण" इत्यादीनि । महितगम्भीर - प्रौढार्थ-विलसित मिदं नीतिवचनजातं सङ्कटे महति वर्तमानान् नैराश्यनिरपेक्षत्वाऽऽदिदावसन्तप्तान् जना नुपदेशामृतासारै रभिषिञ्चति । तेषु च कामप्यभ्युदयाऽऽशंसा मातनोति । अतिकष्टासु दशासु जनतेयं कर्तव्याणि विस्मरति । अकर्तव्याणि कर्तुमुद्यतते । इत्थ मज्ञानतमस्तिरोहिते गहने कार्यमार्गे नीतिजात मिदं प्रदीपायते । अनेन नीत्युपदेशेन नैराश्यदग्धेषु किमपि समाश्वसनं सान्त्वनं च समुन्मिषति । यथा यथा पर्यालोच्यते तथा तथा काऽपि गम्भीरार्थस्फूर्ति रस्मात् नीतिवचना द्भवत्येव ।

सर्वमप्यतीत्य जीवनं परमकल्याणं तत्साधनं चेति पश्यामः । सर्वेयं लोकयात्रा सति जीवने भवति । यस्मिन् क्षणे जीवनं विरतं भवति तस्मिन्नेव क्षणे लोकबन्धोऽपि विमुक्तो भवति । सर्वोऽयं लोकः सुखदुःखमिश्रः । सर्वोऽपि जन्तुः दुःखानि तरितुं सुखानि लब्धुं च प्रयतते । तथाऽपि सर्वस्य लोकतन्त्रस्य कर्मबद्धत्वात् सर्वस्य जनस्य सुखं वा दुःखं वा अनुत्प्रेक्षितमेव समापतति । सुकर्मणा सुखं दुष्कर्मणा दुःखमिति हि व्यवस्था । सुकृत - दुष्कृतयोः सुखदुःखयोश्च व्यवस्थामिमां पश्यन्तो विवेकिनः सुखेऽपि न हृष्यंति दुःखेऽपि न विषीदन्ति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अतिसङ्कटेऽपि सहनं साधुशील मसहनं प्राकृतजनशीलम् । प्राकृतजनाः विवेकरहिताः रजस्तमोभ्यां पराभूताः कियताऽपि क्लेशेन प्राणत्यागाऽऽदि साहसानि कुर्वन्ति । तदुक्तम् —

"सहसा विदधीत न क्रिया मविवेकः परमापदां पदम् ।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ।।

इति, सर्वैरपि सहनशील मभ्यसनीयम् । येन वयं सर्व सम्पदा माश्रया भवेम । सहनव्रतं सर्वार्थसाधकम् ।

सम्प्रति लोके भग्नाऽऽशाः बहवो जनाः धूमशकट-मार्गेषु पतित्वा वा, विषपानेन वा विद्युच्छक्तिस्पर्शेन वा आत्महत्यां कुर्वन्तो महता पापेन कलुषिताः भवन्तीति वयं पश्यामः । आत्मघातिनां जनाना मन्धतामिस्रादि-नरकपातः स्मृतिषु वर्णितः । पिशाचाऽऽदिघोरजन्मभि स्तेऽत्यन्तं पीड्यन्ते च । अतश्च दुःसहान्यपि दुःखानि सहमानो जनः पश्चात् सुखमपि द्रक्ष्यत्येव । सुखं वा दुःखं वा जीवनस्य स्वभाव एव । यथा सुखेन जन्तुः सम्मोदं भजते तथा दुःखेनापि कमपि संस्कारं लभत एव । जन्तूना मनुग्रहार्थमेव दुःखमपि भगवता कल्पित मिति मन्तव्यम् । हलकृष्टेषु केदारेषु श्यामलानि सस्यानि प्ररूढानि महतीं शोभा मातन्वते । इत्थमेव दुःख

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परम्पराकर्शितोऽपि जन्तुः कमपि संस्कारं लभत एव। "सुखस्याऽनन्तरं दुःखं दुःखस्याऽनन्तरं सुख" मित्यादि वचनानि परिशीलयतां दुःखेऽपि सुखं सुखेऽपि दुःखं चानुभव-गोचरीभवतः। अतश्च महत्यपि सङ्कटे प्राणत्यागो न कर्तव्यः। बहुमूल्यान् प्राणान् कदाऽपि मनुष्यः न त्यजेत्। इमे प्राणाः इदं च शरीर मयं चेन्द्रियवर्गः केनापि निर्मातुं न शक्यन्ते। एषां च पवित्रेषु कार्येषु विनियोग एव भगवता समुद्दिष्टः। दुर्लभं मानुषं जन्म लब्ध्वा, ये तावत् समीचीने कार्ये तत् न नियुञ्जते ते जन्मनः फलं न लभेरन्। "शरीर माद्यं खलु धर्मसाधनम्" इत्युक्त्या शरीरस्य धर्मसाधनत्व मभिसंहितम्। तद्विस्मृत्य तादृश शरीरस्य नाशे ये यतन्ते ते मूढाः नरकमेव यान्ति। अतः श्रेयः प्रेयश्च कामयमानेन पुरुषेण प्रथमतः शरीररक्षणं कर्तव्यम्, पश्चात् शरीरस्य सत्कार्यशिक्षणं च। ये तावत् जन्मनः बहुमूल्यतां ज्ञात्वा शरीराऽऽदिकं रक्षन्तः सुख-दुःखाऽऽदिकं सहमानाः जीवनं यापयन्ति सत्कार्याणि च कुर्वते ते इह चाऽमुत्र च भद्रदर्शिनो भवन्तीति शीर्षक मिद मुपदिशति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्वः स्वार्थं समीहते

—— किलाङ्काडु यज्ञरामशर्मा, चिदम्बरम्

सर्वः सकलः (जन्तुः) स्वार्थं स्वप्रयोजनं समीहते सम्यगभिलषति इत्युपन्यासविषयस्य वाक्यार्थः। अत्र समीहते इति पदं संपूर्वकात् "ईह" धातो निष्पन्नत्वात् इच्छाजन्यक्रियानिष्पत्तिपर्यन्तं अर्थं बोधयति। तेन सर्वोऽपि स्वप्रयोजनं लब्धुं प्रयत्नं करोतीति तात्पर्यं भवति। अत्र अर्थपदेन "अर्थोऽभिधेय-रै-वस्तु-प्रयोजन-निवृत्तिषु" इति निघण्टूक्ति मनुसृत्य प्रयोजनरूपः परिगृह्यते। स्वपदेन 'स्वो ज्ञाता, वात्मनि स्वं, त्रिष्वात्मीये, स्वोऽस्त्रियां धने" इत्यमरकोशात् जीवाऽऽत्मा तदीयः पदार्थश्च स्वीक्रियेते। एवं च पाणिवर्गः समस्तोऽपि (स्वभावतः) आत्माऽऽत्मीयप्रयोजनसिद्ध्यै प्रयतते इति पिण्डितोऽर्थः।

तथैव लोके दृश्यते सर्वेष्वपि लौकिककार्येषु प्रयोजनवदधीना प्रवृत्तिमत्ता। "प्रयोजन मनुद्दिश्य न मन्दोऽपि प्रवर्तते" इत्यभियुक्तोक्तिश्च। सर्वत्र जगति, भृत्यवर्गा दारभ्य महाधिकरणिकप्राड्विवाकपर्यन्तं, प्रयोजन मुद्दिश्यैव सर्वस्य प्रवृत्ति र्वर्तत इति सर्वजनविदितमिदम्। क्वचित् वैदिककार्ये अग्निष्टोमे 'अस्य यज्ञस्य का दक्षिणा' इत्यादि प्रथमत एव सोमप्रवाकेन पृष्टत्वात्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ऋत्विजां प्रवृत्तिः प्रयोजनाधीना वर्तते इति च। तथाच सर्वेषां स्वार्थसमीहा स्वभावसिद्धा न्याय्या अनिवार्या च भवति। अत एव "यदि क्षुण्णं पूर्वैरिति जहति रामस्य चरितं गुणं रेतावद्भिः जगति पुनरन्यो जयति कः?" इति मुरारिवाक्यानुसारेण निखिलकल्याणगुण-रत्नरत्नाकरस्य श्रीरामचन्द्रस्य गुणगणवर्णनप्रस्तावनायां "रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता" इति स्वधर्म-रक्षणं - स्वजनरक्षणं च श्लाघ्यत्वेन वाल्मीकिमहर्षिणा वर्णनं सारस्येन संगच्छते।

परन्तु लोके स्वार्थपरता सर्वैः निन्द्यते इति चेत् तत्र हेतु मुत्पश्यामः तथाहि — "अति सर्वत्र वर्जयेत्" इति सामान्यन्याय मनुसृत्य सर्वोऽपि पुत्रमित्रकळत्र-धन-धान्य-गृहाऽऽराम - क्षेत्राऽऽदिरूपः प्रयोजनपदार्थः सर्वेषां याव-त्प्रमाणकः प्रत्येकं आवश्यकः तदतिक्रम्या त्यधिका या प्रवृत्तिः येषु जनेषु दृश्यते सा तद्वन्तः जनाश्च निद्यन्ते। अत एव क्वचित् धनाऽऽधिक्यं क्वचित् निर्धनत्वं च भवतः। "अहिंसा सत्यमस्तेयं" इत्यादिना प्रोक्ताः सामान्यधर्माः यदि सर्वजनेषु वर्तेरन् सर्वत्र धनाऽऽदिकं व्यापृतं व्यासक्तं च सत् अनिन्द्यं श्लाघ्यं च भवेत्। यथा देहाऽऽदिषु अभिमानः जन्मान्तरवासनया जननकालादारभ्य वर्तते, तथा काम-क्रोधाऽऽदिष्वपि पुत्रमित्रकळत्राऽऽदिदेशपर्यन्त समस्तवस्तु-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ष्वपि च जायत एव । अन्यथा भारतदेशे भारतीयानां स्वतन्त्रराज्यस्वीकरणार्थां षष्टिवार्षिकपरिमाणा उद्वेल्लितप्रवृत्तिः सार्वजनीना कथ मादृता भवेत् । अतः सर्वजन्तुषु नानाविधाः अभिमानाः स्वभावतः उत्पन्ना वर्तन्ते । परन्तु मनुष्याः विवेकतः तेषां हेयोपादेयतां ज्ञात्वा सर्वेषा मविरोधेन स्वीकर्तव्यान् अभिमानान् ऊरीकृत्य अवश्यं परित्याज्यान् दुरभिमानान् संत्यज्य मरणपर्यवसायिनीं अत्याशां दूरीकृत्य, दया - दाक्षिण्य - दान - अहिंसा - समत्वाऽऽदि – दिव्यगुणाऽऽदिकं श्रेयस्करं, सर्वजनहितकरं, सर्वश्लाघ्यताप्रदं, स्वीकृत्य देशदेशीयभाषाऽऽदिषु प्रत्येकं भिन्नभिन्नाभिप्रायवता मपि कर्तव्याकर्तव्यविषयकविवेक ज्ञानेन 'वयं सर्वे भारतीयाः' (भारतदेशस्थ जननमरणधर्मकाः) 'अस्मदीयोऽयं भारतदेशः' इत्यादि प्रसृमराभिमानेनैव संयुक्ताः सर्वेऽपि वर्तेरन् भारतीयाः । तद्विषये स्वयं तीव्रश्च यत्नोऽपि विधातव्यः अन्यैश्च कारयितव्यश्च । भारतदेशीयपारमार्थिकदेहविमुक्ति मधिकृत्य सर्वतन्त्रस्वतन्त्राः श्रीमत्परमहंसपरिव्राजकाऽऽदिबिरुदाङ्किताः आदिशङ्करभगवत्पादाः उपदिशन्ति —

"इतः कोः न्वस्ति मूढाऽऽत्मा यस्तु स्वार्थे प्रमाद्यति ।
दुर्लभं मानुषं देहं प्राप्य तत्रापि दुर्लभम् ॥"

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति एतेन स्वार्थप्रणवता अनिन्द्यकोटावेव प्रवेशितेति ज्ञायते। सर्वास्वपि वनस्थलीषु सर्वेषु खण्डान्तरेषु च वर्तमानानां जनानां सर्वेषां अभिमानाः स्वार्थाः अनिवार्याः वर्तन्त एव। यतः प्रतिदिनं दैनिकपत्रिकासु तत्तत्स्थलेषु तत्तद्वर्गीयाः स्वेषां स्वातन्त्र्याऽऽदिप्रयोजनं प्राप्तुं निरन्तरं प्रयतन्ते इति। अथः स्वार्थसमीहा न्याय्या सर्वजनहिता परिमिता च भवेत् इति।

अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति

— पोदिल्ल लक्ष्मीनारायणशास्त्री

अत्र गम्लृधातोः शतृप्रत्ययान्तत्वेन निष्पन्नत्वात् "गच्छन्नि"ति रूपं भवति। अतः उत्तरदेशसंयोगानुकूलव्यापाराश्रयः इत्यर्थो लभ्यते। तस्य नञा सह समासे कृते "अगच्छन्नि"ति रूपं भवति। एव च उत्तरदेशसंयोगानुकूलव्यापाराभावाश्रयः इत्यर्थः पर्यवस्यति। विनतायाः अपत्यं पुमान् वैनतेयः गरुत्मा नित्यर्थः। एवं च विष्णुवाहनः, बलवान्, अत्यन्तवेगवानपि गरुत्मान् इच्छापूर्वकोत्तरदेशसंयोगानुकूलव्यापाराश्रयो न भवेद्यदि एकं पदमपि न गच्छतीति पर्यवसितोऽर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्वल्पजन्तुः, अत्यल्पबलवान्, प्रतिक्षणमृत्युः पिपीलिकः अनलसः इच्छागमनाश्रयः भवेद्यदि योजनानां शतान्यपि गन्तुं शक्नोति ।

लोकेऽस्मिन् प्रवृत्तिनिवृत्तिमार्गौ द्वौ विद्येते । तयोरन्यतरस्य प्रथममार्गस्य साधानाय जीवानां करचरणाद्यवयवान् असृजच्छतानन्दः । जीवाः सर्वोऽपि स्वस्वानुकूलव्यापाराय तानुपयुज्य स्वेच्छानुकूलफलान्यनुभवन्ति । उपरि निर्दिष्टा अवयवाः स्वल्पदेशगमनायैव समर्था भवन्ति दूरदेशगमनाय तु विमान, धूमशकट, द्विचक्राश्वशकटादिकान् उपयुञ्जते । तत्तद्यानगमनसाध्यफलानि च अनुभूयन्ते । अत एव विमानमधिरुह्य देशान्तरं गत्वा तत्तद्देशविशेषौन्नत्यं दृष्ट्वा तत्तत्समृद्धिमद्भिः देशान्तरैरस्माकं भारतदेशं तुलयितुं प्रधानमन्त्री प्रयतते । परिदृश्यते चास्माभिः दूरदेशगमनाय यादृशवेगविशिष्टोपकरणानि उपयुज्यन्ते इति ।

प्रयत्नपूर्वकप्रवृत्तिं विना लोके कश्चिदपि पुरुषः किञ्चिदपि कार्यं साधयितुं न समर्थो भवति । एतस्मिन् विषये किञ्चित्पुरावृत्तमुदाह्रियते ।

एकस्मिन् प्रदेशे शशकच्छपौ निवसतः । तयोः कालक्रमेण गमनविषयकप्रतिज्ञा समजायत । कच्छपो

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गम्यप्रदेशं प्रति यातुं समय मनुसृत्य प्रयाणं करोति स्म। शशस्तु "शीघ्र महं गमिष्यामी"ति बुद्ध्या अत्यन्तगर्वावेशेन उपेक्षाभावं कृत्वा प्रयाणं नाकरोत्। तदानीं मन्दगमनप्रवृत्तिरपि कच्छपः गम्यप्रदेशं प्रथम मेव जगाम। शशस्तावत् स्वाऽलसत्वं संस्मृत्य ललज्जे ।

गुणकर्मविभागपूर्वकं शतानन्देन सृष्टाः चातुर्वर्ण्यप्रजाः स्वस्वनियमा ननुसृत्य कर्मासक्ता यद्यवर्तिष्यन्त तदानीं सुभिक्षः सर्वसस्यसम्पन्नो देशः अभविष्यत्। अद्यतनकाले प्रजाना मेव प्रभुत्ववत्वात् सर्वाः प्रजाः स्वातन्त्र्य मवलम्ब्य पूर्वाचरितमार्गान् परित्यज्य स्वकपोलकल्पनानुप्रवृत्तयो भूत्वा देशान्तराचारादिकान् अनुसृत्य प्रवर्तन्ते। अत एव स्वस्वकर्मानुरूपफलं नानुभूयते। अलसत्वं परित्यज्य सर्वाः प्रजाः स्वस्वकर्मासु प्रवर्तरन्नि त्यभ्यर्थये। अनलसत्वे प्रयोजनप्रदर्शिकां कथामेकां कथयामि। शृणुतः —

आसी दस्मिन् महीपीठे विवेकवान्, बहुपुत्रः, द्विषत्तिमिरभास्करः, सद्गुणहंसानां सरः, दोषतृणहुताशनः मण्डपो नाम राजा। तस्य सर्वसौभाग्यवलिता अवना उदिता कमलेव, विलासिनी "लीला" नाम भार्या आसीत्। सा पत्यौ मुदिते मुदिता, आकुलिते समाकुलिता संस्क्रुद्धे केवलं भीता बभूव। सा शुभसङ्कल्पशालिनी प्राणेभ्योपि प्रियः एष जगतीपतिः अजरामरः कथं स्यादिति चिन्तयामास।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

युगशतान्यपि एतादृश प्रेम्णा अनेन भर्त्रा कथं रमेयेति विचिकित्सया ज्ञानवृद्धान्, वयोवृद्धान्, विद्यावृद्धान् द्विजा नाकारणं कृत्वा तान् सम्पूज्य नता सती "अमरत्वं कथं भवे" दित्यपृच्छत् । ते तु सिद्धयः "तपोजपनियमै स्सम्प्राप्यन्ते । किन्तु कथञ्च नामरत्वं न लभ्यत" इति प्रत्युत्तरयांचक्रुः । तदानीं प्रियवियोगतो भीता वर्षसहस्रेणाऽपि आदौ भर्ता मरिष्यतिचेत् अस्मा च्छुद्धान्तमण्डपात् जीवः यथा न यास्यति तथा कर्तुं प्रयतिष्ये । तदा भर्त्रावलोकिता यथासुखं निवत्स्यामीति निश्चित्य ज्ञप्तिरूपां सरस्वती माराधितु मारेभे । तदा तस्याः जपोपवासनियमै रतीव सन्तुष्टा प्रत्यक्षाभूत्वा सरस्वती "तव भर्तृभक्त्या तुष्टास्मि । वरं वृणीष्वे" त्यवादीत् । तदा सा लीला "विदेहस्य मम भर्तु र्जीवः निजान्तःपुर मण्डपात् यथा न यास्यति तथा वरं देही" त्युक्त्वा 'यदा त्वां स्मरामि तदा त्वं प्रत्यक्षा भवेः' इति वर मवृणोत् । तदा देवी "तथास्त्विव" त्युक्त्वान्तर्दधे । कतिपय वत्सरेषु गतेषु भर्ता चैतन्यरहितवा नासीत् । तदानी मतिदुःखिता सा लीला सरस्वतीं सस्मार । तदा प्रत्यक्षा वाणी "त्वं सूक्ष्मशरीर माश्रित्य मया सह आगमिष्यसिचेत् तव भर्तारं दर्शयिष्यामी" त्यवोचत् । तदा अतिकष्टान् यमनियमा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सनप्राणायामप्रत्याहारध्यानधारणादि नियमैः निर्विकल्पक-समाधिं सम्प्राप्य सूक्ष्मशरीरं धृत्वा लोकान्तरे सर्वलक्षण-सम्पन्नं भर्तारं दृष्ट्वा, ततोपि दूरदेशस्थितोर्ध्वलोकान् सञ्चार्य पुनस्सरस्वत्या सहाऽगत्य स्वभर्तारमुज्जीवया-मास। अतः अनलसत्वेन असाध्यं किमपि नास्तीति व्यञ्जयन्तीयं कथा। "गच्छन् पिपीलिको याति योजनानां शतान्यापि। अगच्छन् वैनतेयोपि पद मेकं न गच्छती" त्यार्योक्ति प्रबोधयति।

उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः

भाषाप्रवीण श्री रोम्पिचर्ल श्रीनिवासाचार्यः

उपाये = उपगता ये (पुरुषे) सति य न्न शक्यं त त्परा-क्रमै र्नशक्यं हीति। अथवा उपायेन = उपगता येन (पुरुषेण) य च्छक्य न्नत त्पराक्रमै श्शक्यं हीति। अत्र यो नाम धनागमः। प्रथमान्वये, धनसाध्यं कर्म पराक्रमसाध्यं न भवतीति भावः। द्वितीयान्वये तु, पराक्रमिणा मप्यसाध्यं कर्म धनिन स्साधयितु मलं भवन्तीति तात्पर्यम्। अर्थस्यै

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वार्थसाधने परार्थ्यंयता प्रतिपाद्यते। अतो द्वितीय ये वा न्वय स्साधीयान् प्रतिभाति। तस्यैव वक्तृविवक्षापेक्षितत्वात्।

न खलु लोकेऽर्थवता मर्थसाधनव त्पराक्रमवतां तदित्यस्यान्वयव्यतिरेकाभ्यां समर्थनाय सन्ति बहू न्युदाहरणानि। यथा 'यस्यास्ति वित्तं स नरः कुलीनः' 'बुभुक्षितैर्व्याकरणं न भुज्यते, पिपासुभिः काव्यरसो न पीयते। न विद्यया केनचि दुद्धृतं कुलं, हिरण्य मेवार्जय निष्फलाः कलाः, इत्यादीनि। 'निर्धनपुरुष श्शष्पसमानः।' 'तृणा ल्लघुतर स्तूल स्तूलादपि च याचकः' इत्यादीनि च।

अन्यथापि मकुटवाक्यस्यार्थो वर्ण्यते यथा — उपाये (कार्यसाधन) कौशले सति य न्नशक्यं त त्पराक्रमै र्नशक्यं हीति। नोचेत् - उपायेन कौशलेनाथवा नैपुण्येन य च्छक्यते न तत्पराक्रमै श्शक्यं हीति। अत्रापि पूर्ववद् द्वितीय एवाऽन्वयः स्वारसिकतया स्वीकार्यः।

अस्मिन्नर्थे काचन कथा उदाह्रियते यथा — अस्ति खलु महाकवीं रसज्ञशेखरः परं काळिदासस्य मित्रं पोषकश्च राजा भोजो नाम। यस्य हि कीर्ति रभिष्टुता काळिदासेनैव महाकविना 'निरालम्बा सरस्वती, भोजराजे दिवंगते' इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स कदाचित् द्यूतासक्तचित्तो देवीं विमनायिता मतानीत्। यदा ताव द्राजा बहुभि राकारितोऽपि न सस्मारात्मीय मवरोधम्। देवी काळिदास मयाचत। 'भवानेव यथाकथ मपि महाराजानयनेऽल मिति। सच भिक्षुरूपी कविचन्द्रो राजान मभ्येत्या दृश्यत मांसखण्ड-धारिणा हस्तेन राजातु विस्मितोऽन्वयुंक्त 'यतिसार्वभौम ! अपीदं युक्तं य द्भवादृशेन मांसं निषेव्यते' इति। काळि-दास स्तदा ब्रूते। 'राजन्! किमाह भवान्' असति मद्ये किन्नामोपलब्धेनाप्येतेनाऽमिषखण्डेन' इति। राजातु परं चकितः पुनरपृच्छत्। 'न केवलं पलल मपितु मदिरापि ते प्रिया ?' इति। तदा परिव्राजकेनालोचित मेव समाधत्त। 'सतिहि वाराङ्गनाजने मदिरास्वादस्य पराकाष्ठा' इति। ततो भोजोऽनुयुक्तवान्। 'न खलु ते कुतोऽपि धनार्जनं घटत ? इति। अस्ति खलु चौर्यं अथवा द्यूतकळा तत्साधन' मिति पारशर्याह।

ततोऽद्भुताक्रान्तस्वान्तो नरपति रप्राक्षीत् — मस्करिन्। चौर्यद्यूतयो रपि ते परिश्रमो वर्तते वा इति।

कर्मन्दी तु प्रभो! भ्रष्टस्य नैकधा हि गति र्भवति, किं तत्राश्चर्य मिति झटिति समाहितवान्। भूपतिः परं लज्जित स्तेन समाधानेन भिक्षुं तं प्रणम्याञ्जसाऽन्तः-पुर मगात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

— अथ मन्त्र संग्रहः —

भिक्षो ! मांसनिषेवणं किमुचितं? किन्तेन मद्यं विना,
मद्यं चापि तव प्रियं ? प्रियमहो वाराङ्गनाभिस्सह ।
वारस्त्रीरतये कुत स्तव धनं ? चौर्येण द्यूतेन वा,
चौर्यद्यूतपरिश्रमोस्ति भवतो? भ्रष्टस्य का वा गतिः।।

इति अनया कथया भिक्षोः राजानयननैपुण्य मुपदर्शित मिति उपायः सर्वार्थनां समुत्कृष्टये भवेदिति प्रकृत वाक्य समर्थनम् ।

निरस्तपादपे देशे ह्येरण्डोऽपि द्रुमायते

— टि. महादेवशास्त्री

विदितमेवैतत् सर्वेषां, यत् सर्वाऽऽकारः सर्वशक्तिमान् च भगवान् भुवनसृष्टौ मनुष्यान्, कीटान् सरीसृपान्, पक्षिणः, मृगान् वृक्षान् लताश्च ससर्जेति । तेषु मनुष्य-जन्म अतीव श्रेष्ठतमम् । मनुष्य एव स्वार्जितेन महता पुण्येन उत्तमां गतिं (मोक्षं) प्राप्तुं शक्तः । अन्ये कीटा-दयः उत्तरोत्तरजन्म प्राप्यैव मोक्षं प्राप्तुं शक्नुयुः । मनुष्य इति पदं "मन्" धातोः संजातम् । मनुष्यस्यैव इदं शुभं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इदमशुभं, "इदं कर्तव्यं इदमकर्तव्यं" इति मननशक्तिः अस्ति। मनुष्यः स्वजीवनाय सुमहत् पापकर्माणि कर्तुं सन्नद्धः अस्ति। तन्न युक्तम्। वृत्यर्थं मनुष्यः नातिचरेत्। सा ईश्वरेणैव क्रियेत। अत एवोक्तं —

"वृत्यर्थं नातिचेष्टेत साहि धात्रैव निर्मिता।
गर्भादुत्पतिते जन्तौ मातुः प्रस्रवतः स्तनौ॥"

इति ईश्वरः शिशो र्जननात् पूर्वमेव मातुः स्तनयोः पयः प्रवेशयति। एवं स्थिते किमिति अस्माभिः दग्धोदरस्यार्थं अकार्यशतानि क्रियन्ते? अकार्यशतेषु कृतेष्वपि जीवनोपायः कदाचित् न सिद्ध्यति। स्वपूर्वजन्मकर्माण्यनुसृत्यैव सर्वेषामपि सुखेन कष्टेन वा जीवनं भवति। तदर्थं अधिका प्रवृत्तिः न करणीया। अत एवोक्तं —

"आयु र्वित्तं च भार्या च विद्या निधनमेव वा।
पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनः॥"

इति। भगवान् तत्तत्कर्मफलं अनुसृत्यैव आयुर्वित्ताऽऽदिकं गर्भ एव सृजति। किञ्च मनुष्यः जननमरणक्लेशनिवृत्तये सद्विद्यां अभ्यस्येत्। सद्विद्या यदि कस्मिंश्चित् विद्येत तस्य शरीरपोषणे चिन्ता स्वल्पाऽपि नास्ति। अत एवोक्तम्।

"सद्विद्या यदि का चिन्ता वराकोदरपूरणे।
शुकोऽपि लभते वृत्तिं हरे राम इति ब्रुवन्॥"

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति तिर्यग्जातिसंभूतः शुकोऽपि देवाऽऽलयेषु "हरे, राम!" इत्यादिदेवनामानि कीर्तयन् सर्वैरपि पूज्यः सन् आहारं लभते। किमुत वयम्? एवं स्थिते यत्र देशे सकलशास्त्रप्रवीणः पण्डितः नास्ति, तत्र अल्पधीरपि पूज्यः भवति। यथावा यस्मिन् देशे पुष्पफलदातारः चूताऽऽदयः अथवा पूज्याः वृक्षा अश्वत्थाऽऽदयः न सन्ति तस्मिन् एरण्डः वृक्षविशेषोऽपि, द्रुमत्वेन गण्यते।

कस्मिंश्चित् नगरे कश्चित् धनिकः बभूव। तत्सकाशे अकिंचनः कोपि ब्राह्मणः कायस्थपदवीं उवाह। तत्पत्नी अपि तस्मिन् एव गृहे गृहकृत्यव्यग्रा अभूत्। एवं स्थिते तस्मिन् गृहे एकदा माङ्गलिकः उत्सवः प्रवृत्तः। तदर्थं तन्नगरस्थाः धनिका आधिकारिका वणिजः सर्वे महान्त आहूताः भोजनाऽऽदिकं सर्वं महता समारोहेण संवृत्तम्। तद्गृहस्थाः सर्वेऽपि आगन्तुकानां उपचरण एव रात्रिपर्यन्तं व्यग्रा बभूवुः। इमं कायस्थं ब्राह्मणं कोऽपि न सस्मार। क्षुधापीडितः अयं स्वगृहं गन्तुमपि अशक्तो बभूव। अर्धरात्रे सर्वेऽपि सुप्ताः। तदा ब्राह्मणपत्नी निभृतं स्वभर्तृसमीपमागत्य एवमभणत्। 'नाथ, अत्र स्थितानां अश्वाऽदिवाहनानां मध्ये कमप्युत्तमं तुरगं स्थानान्तरं प्रापय्य किमप्यजानन्निव तूष्णीं भव। प्रातः सर्वेऽपि तं मृगयमाणाः व्याकुला भविष्यन्ति। तदानीं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अहं त्वां दैवज्ञं वक्ष्यामि। त्वमपि नक्षत्राणि ग्रहांश्च गणयन्निव क्षणं स्थित्वा तुरगप्रदेशं वद। ततः प्रभृति प्रसिद्धः कार्तान्तिको भविष्यसि" इति। तथैव कृते तत्सर्वं यथाऽभिलषितं संवृत्तम्। ततः प्रभृति सः प्रसिद्धः दैवज्ञः बभूव। सर्वेषां आदरणीयश्चासीत्।

कदाचित् तद्देशराजगृहे कोऽपि शिशुः सर्वाऽऽभरण-भूषितो विनष्टः बभूव। तदन्वेषणे सर्वेऽप्युपाया विफला बभूवुः। अथ राजा ब्राह्मणमेनं आहूय बालकस्थानं वक्तुं प्रार्थयामास। अनन्यगतिकोऽयं विप्रः विजने स्वेष्टदेवतापूजादिकं कृत्वा स्वैरमेवं विललाप "जिह्वे! त्वयैवाहं विनष्टः। त्वयैवाहं किमप्यहं प्रालपम्।" इति वस्तुतः तं शिशुं अपहृतवती जिह्वानाम्नी काऽपि चेटी एतत्सर्वं स्वयं दृष्ट्वा तत्प्रलापं च श्रुत्वा तं द्विजं प्रणम्य शरणं प्रार्थयामास। शिशुं च ददौ। तं शिशुं राज्ञे द्विजः प्रादात्। अनेन कार्येण सः प्रसिद्धतरः बभूव।

एवं स्थिते अस्मिन् द्विजेऽसूयाविष्टाः केचित् दैवज्ञाः राजसकाशे इमं मायादैवज्ञं कथयन्तः सर्वेषां पुरतः कामपि परीक्षां दातुं प्रार्थयामासुः। तदा ते सर्वे एकस्मिन् घटे कमपि मण्डूकं निक्षिप्य एतदन्तर्गतं वस्तु यद्ययं वदेत् तर्हि सर्वे वय अस्य दासा भविष्याम इति प्रोचुः। राजाऽपि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तदङ्गीकृत्य तं ब्राह्मणमाकार्य सर्वं निवेदयामास । तच्छ्रुत्वा स ब्राह्मणः स्वमनसि भगवन्तं ध्यात्वा बाल्ये स्वपित्रा स्वस्य कृतं मण्डूक इति नाम उच्चैः प्रललाप । तदा सर्वेऽपि विस्मिताः तस्मै महत् पारितोषिकं ददुः । तस्मात् यस्मिन् देशे पण्डितः नास्ति तत्र अल्पधीरपि पूज्यते । अत एवोक्तं "निरस्तपादपे देशे एरण्डोऽपि द्रुमायते" इति ।

यत्ने कृते यदि न सिध्यति कोऽत्र दोषः

— परायितम् कृष्णमूर्तिः

सर्वस्यापि लोकस्य व्यवहारः यत्किञ्चित्प्रयोजन मुद्दिश्यैव भवति । मन्दोऽपि विना प्रयोजनं स्वकार्ये न प्रवर्तते । अत एवोक्तं "प्रयोजन मनुद्दिश्य न मन्दोऽपि प्रवर्तते" प्रयोजनं नाम कार्यस्य फलसिद्धिः ।

सिद्धेस्साधनस्य कार्यकारणरूपस्सम्बन्धो विद्यते । साधनसेकरणप्रभृति कार्यसिद्धिपर्यन्तं क्रियमाणो व्यापार एव-प्रयत्न इत्युच्यते । स एव प्रयोजनापरपर्यायः ।

कार्यसिद्धये प्रयत्नः अवश्यकरणीयो भवति । प्रयत्न-शीलो हि पुरुषः उद्योगीति व्यवह्रियते । तादृश मुद्योगिनं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पुरुषसिंहं लक्ष्मीस्स्वयमुपैति । उद्योगशब्दस्य उद्यम इति अर्थः । उद्यमेन हि कार्याणि सिध्यन्ति न केवलं मनोरथैः। कुम्भिकुम्भविदलनपटोरपि केसरिण स्सुप्तस्य मुखे स्वय मागत्य मृगा न प्रविशन्ति । अतः कार्यसिद्धि मिच्छता पुरुषेणावश्यं प्रयत्न-शीलेन भवितव्यम् । 'नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्' इति गीतावचनेन सर्वेऽपि सततं यत्किंचित्कार्यनिर्वहणपरा भवन्तीति ज्ञायते । यद्यस्माकमुद्यमः केवल मुदरपोषणाऽऽदि स्वार्थं मुद्दिश्य प्रवर्तते तदा तादृशमुद्यमं सन्तो नाभिनन्दन्ति । परोपकारं, देशाभिवृद्धि समाजक्षेमं विश्वकल्याणं वा मनसि निधायोद्यमः क्रियते यदि तदा तादृशोद्यमस्य पुरुषस्य सन्तो न केवलं वाचा किन्तु कर्मणाऽपि साहाय्यकमाचरन्ति ।

भारतभूमेरेव कर्मभूमित्वात् तत्रत्यानां कर्मपरतन्त्रत्वं सर्वलोकसुखावाप्तये भवति । कर्तव्यो नैकविधः । पित्रोः पुत्रं प्रति पुत्रस्य पितरावुद्दिश्य, राज्ञः प्रजाः प्रति, प्रजानान्तु राजानं प्रति विध्युक्तकर्मकर्तव्यनिर्वहणं विद्यत एव। श्रुति - स्मृति - सदाचार - प्रमाणमूलमेव भारतीय कर्म वैशिष्ट्यम् ।

मनुष्यस्य कर्मबाहुल्य मेव तदीयं यत्नबाहुल्य मुद्घोषयति । कर्तव्यपालनेनैव कार्यसिद्धि र्भविष्यति। कर्तव्यनिर्वहणे निद्रातन्द्राऽऽदिकं परिहार्यं भवति । कर्तव्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कर्म येन न क्रियते स सतां मन्यवे कल्पेत। अतः पुरुषेण प्रयत्नशीलेन, जागरूकेण, कार्यदक्षेण भवितव्यम्। चातुर्वर्ण्यस्य यजनयाजनाऽदिकं कर्मजातं निर्दिष्टं वर्तते। यदा कृषीवलः क्षेत्रं हलेन कर्षति क्षेत्रा त्पाषाणादीनपसारयति, क्षेत्रं सिञ्चति, बीजं वपति। सस्यापकृद्भ्यः कीटादिभ्यः रक्षां करोति तदैव सः फलभाग्भवति। कर्तव्यानां यस्य कस्यचिल्लोपे पूर्णफलं न साधयति। अतिवृष्टचनावृष्टचादिप्रकृतिवैपरीत्ये संभवति सति कृषीवलस्य प्रयत्नो विफलो भवति। परन्तु न तत्र कृषीवलस्य दोषः किन्तु प्रतिकूलवर्तिनो दैवस्य। अत एव कृषीवलाः कृषिं नैरन्तर्येण कुर्वन्ति। सफला भवन्ति। अत एवोक्तं "कृषितो नास्ति दुर्भिक्षं" इति। अपरं च धर्मपुत्रो युधिष्ठिर स्स्वस्य भ्रातृजनस्य च ग्रासवासोऽर्थं, सर्वविध्वंसकरयुद्धनिवारणायैव पञ्चग्रामदानपरिमिता मभ्यर्थनां कुरुसभायां भगवतः श्रीकृष्णस्य मुखात् कारयामास। परहिंसारिरंसव स्सुयोधनाऽद्यास्ता अल्पीयसी मभ्यर्थनां निराचक्रुः। एवं च कृतप्रयत्ने धर्मिष्ठे युधिष्ठिरे कंचन दोषं न पश्यामः। अत एवोक्तं "यत्ने कृते यदि न सिद्धचति कोऽत्रदोषः" इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मित्रद्रोहे च पातकम्

— प. वें. कृष्णमाचार्यः

मेद्यति स्निह्यतीति मित्रम् । "ञिमिदा = स्नेहने" इत्यस्माद्धातोः निष्पन्नमिदं पदम् । मित्रं सखा वयस्यः सुहृत् इत्यनर्थान्तराणि पदानि । लोके प्राणिनां मित्रसमं वस्तु नास्तीत्युक्ति र्नातिशयोक्तिः । असम्पत्तौ उपकारी, गुह्यविषयकथनार्हः, आपद्रक्षकश्च भवति सखा । स एव सदाऽस्माकं कल्याणाकांक्षी, न त्वन्यः । तादृश मित्र मुद्दिश्य द्रोहचिन्तन मतीव पातकमित्यामनन्ति वृद्धाः । सत्यं चैतत् । मित्रस्वरूप - स्वभाव - परिशीलने नेदं स्फुटीभविष्यति । तथाहि - राजाऽस्माननुशास्त्येव नानुनयति । भार्या केवल मनुनयति नतु शास्ति । मित्रं तूभयधा प्रवर्तते । किञ्चावसर मनुसृत्य लालयति दण्डयति संस्कुरुते च सः । मैत्री ह्याहारदानात् पंक्षिणां, भयाल्लोभाच्च मूर्खाणां दर्शनादेव सतां सम्पद्यते । किञ्च सतां विषये सप्तस्वेव पदेषु मैत्री सिद्ध्यति । अत एव "साप्तपदीनं सख्यं" इत्युच्यते । सा च मैत्री समानशील-व्यसनेषु बहुलं दृश्यते । असदृशेषु तु नैव स्नेहः । नहि तैलसलिलयोः मेलनं कदाऽपि सम्भवति । एवं सति सवयस्कं सुगुणोपेतं सहृदयं मित्रं वृणुयात् । एतादृश

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सन्मित्रदर्शनं दिने दिनेऽभिनवमिव शोभते । तद्दर्शनेन समुपजातं सुखमनुपमं भवति । सागर स्सर्वरत्नै स्सम्पूर्णोऽपि प्रतिदिनं चन्द्रोदय मभिलषत्येव । अत एव हेतोरपि सर्वसम्पत्समृद्धैरपि नरैः सुहृत्सम्पादन मवश्य कर्तव्यमेवेति प्रतिभाति । समुपस्थिते च व्यसने वाङ्मात्रेणापि साहाय्यं मित्रादन्यो न कुरुत इत्यत्र न विवादः । दुर्जनं दूरतो वर्जयेत् । तस्य सङ्गतिवशात् निर्लिप्तोऽपि जनः सकलाऽऽपदां भाजनं भवति । परिदृश्यते हि कालायस्सम्पर्कवशादनलस्य ताडनम् । किञ्च मूर्खो मृद्घट इव सुखभेद्यो दुस्संधानश्च भवति । सुजनस्तु सुवर्णघट इव दुर्भेद्यः सुसंधानः । अतः सुजनमैत्री कर्तव्या । एषा पूर्वाह्णच्छायेव क्रमाभिवृद्धि माप्नोति । आपत्काले यस्सखा भवति स एव निस्स्वार्थसखः । तादृश मित्रसंपदेव संपद् न तु रत्नाऽऽदिसम्पत् । सन्मित्रवन्तं श्रीः स्वयमेवाऽऽवृणोति । अत एव दरिद्रोऽपि मित्रवान् सकलाश्चाऽपदः सुखेन तरति । सर्वाण्यपि कार्याणि साधयति । दाशरथी रामः सुग्रीवाऽऽदि सन्मित्रमण्डलोपेतः सकललोकरावणं पौलस्त्य महनत्किल । मित्रं, रजतं, सुवर्णं बुद्धिश्चेति चत्वारि भाग्यकारणानीति बृहस्पति रप्यब्रवीत् । तत्राप्यैहिकामुष्मिकमङ्गलसाधकत्वात् सखैव सर्वाधिको भवति । मित्रेण तावत् समवयस्केन भाव्यमिति 'वयस्य' इति पदमेव ज्ञापयति । वयसा तुल्यो वयस्य इति हि तदर्थः । किञ्च

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

समानशीलेन भाव्यमिति पूर्वमेवोक्तम्। नहि सधन-निर्धनयोः वेदान्तविन्मूर्खयोः, शान्त - क्रूरचित्तयोः, वीर - भीर्वोर्वा मैत्री संघटते। नीचेनाधिकेन वा स्नेहो न कर्तव्यः। अनुभूयते खलु खट्वायाः मत्कुणसंगत्या दंडताडनम्। क्षीरस्य वह्निसंगत्या क्षीणता।

एवञ्चैतादृशस्य जीवितसर्वस्य सख्युः द्रोहचिन्तन मतीव पातकम्। कृतघ्नतैव भवति। कृतघ्नात् प्रजापतिरपि बिभेति। विश्वम्भरापि न क्षमते।

सहसा विदधीत न क्रियाम्

— डि. टि. ताताचार्यः

लोके यः कोऽपि यत् किमपि कर्म सहसा, विवेचन मकृत्वा, त्वरया, न कुर्यात्। "अविवेकः परमापदां पदम्" अविवेकः परं, विवेचनविरह एव, त्वरया कर्मकरणे प्रवर्तनद्वारा, आपदां=बहूनां कष्टानां, पदं कारणं भवति। (यद्वा) परमापदां महतां कष्टानां कारणं भवति। (अथवा) आपदां परं पदं प्रधानं कारणं भवति।

अत्र निदर्शनं प्रसिद्धा ब्राह्मणीनकुलकथा। ब्राह्मणी काचित् स्वगृहे नकुलमेकं पुपोष। सा कदाचित् सुप्तं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्वशिशुं शय्यायां शाययित्वा स्नातुं नदीं जगाम। तदा कश्चन सर्पः शिशुशयनसमीप मागच्छत्। तं दष्टवान् तदा नकुलः। द्रुतमभिपत्य फणिनं बहुधा खण्डयित्वा मारयामास। आत्मना कृतमिदं शिशुरक्षणकर्म सद्य एव ब्राह्मण्यै ज्ञापयितुकामः सः सर्पशोणितरूषितेनैव मुखेन नद्यां ब्राह्मणी यत्र अवर्तत तत्र अधावत्। आर्द्ररक्तमुखं तं पश्यन्ती सा "शिशुमेव दष्ट्वा अयं हिंसितवान्। तस्यैव रक्तं अस्य मुखे दृश्यते।" इति भ्रान्त्या तं तदैव तत्रैव शिलाप्रहारैः व्यापादयामास। अथ सा गृहमागत्य यदा पश्यति, तदा प्रबुद्धः उत्तानशयः शिशुः हस्तपादं विधून्वन् हासविकासिना वदनेन आत्मनः प्रहर्षं प्रकाशयन् विललास। शय्यासमीपे सर्पशरीरखण्डाश्च अदृश्यन्त। सपदि सा आत्मनोऽसमीक्ष्यकारितां जानाना भृशं मन्वतप्यत। "अहो बत आत्मना पोषितं, आशीविषं हत्वा शिशुं रक्षितवन्तं महोपकारिणं नकुलं अनालोच्य अवधिषमिति अतिमात्र मन्वशोचत्।

नकुलस्य मुखे असृग्दर्शनानन्तरं "कस्येदं रक्तं अस्य मुखे दृश्यते? किं शिशोः अथवाऽन्यस्य कस्यचित् प्राणिनः? गृहं गत्वा पश्यामि। ततो निर्णयो भवेत्। यदि शिशोरेवेदं रक्तं, तर्हि तं दष्टवान् अयं दुष्टो नकुलः इति हन्तव्यः।" इत्येवं यदि सा पर्यालोचनं कृतवती अन-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विष्यत् तर्हि स्वेन वर्धितस्य उपकर्तुश्च नकुलस्य वधः, तेन महान् अनुतापश्च तस्या नाभविष्यत् ।

इदमन्यत् अभिनवं निदर्शनम् । गृहिणं गोपाल मिश्रं अभिगम्य कश्चिदवोचत् — "अवन्तरवीथ्यां महान् कोलाहलः । बालानां युद्धं प्रवृत्तं; वृद्धानां युद्धे पर्यवसित मभूत् । तत्र एकस्यां कक्ष्यायां धुरन्धरः भवत्पुत्रो बहुभानुः" इति । शमप्रधानो गोपालमिश्रः तदाकर्ण्य न परं विषण्णोऽभवत्, किन्तु पुत्रं प्रति अतिमात्रं क्रुद्धोऽभवत् । तस्मिन्नेव क्षणे गृहस्यान्तः प्रविशतः पुत्रस्य दक्षिणे कपोले बलवतीं चपेटां ददौ ।

अतर्कितपतितं तं गाढप्रहारं असहमानः बहुभानुः "हा" इत्याक्रुश्य भूमौ पतितः निष्प्रज्ञोऽशेत । तमाक्रोशं श्रुत्वा तत्र आगता एकपुत्रा तदीया जननी तदवस्थं तं दृष्ट्वा मृतमेव मन्यमाना, दुस्सहत्वात् तस्य दुःखस्य स्वयमपि मर्तुकामा द्रुतपदं धावित्वा कूपे पपात । बहुभिः शैत्योपचारैः चिरेण प्रत्यागतप्रज्ञो बहुभानुः शनै रुत्तस्थौ । परन्तु तस्य दक्षिणाक्षिगोलकं प्रहारवेगेन बहिरागतं दर्शनशक्तिशून्यं तदीयां मुखशोभां अतीव विकला मकरोत् । विकृतमुखः सः काणो बभूव । तन्माताऽपि कूपात् कथञ्चि दुद्धृता प्रत्यापन्नजीविता पतनाभिघातजनितस्य शिरोव्रणस्य वेदनां चिर मनुबभूव ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गोपालमिश्रश्च, वीथ्यन्तरवृतस्य युद्धस्य स्वपुत्रस्य-च न कश्चित् सम्बन्ध इति, तस्मिन् समये सः सन्निहितः ग्रामान्तरवर्तिनं सुहृदं द्रष्टुं गतः तत्रैव स्थितः। तत-प्रत्यागत इति च तत्वं जानन् भ्रान्तस्य कस्यचित् वचन-श्रवणमात्रेण उपनिपतितां आत्मनोऽविमृश्यकारितां विचिन्त्य चिरं विप्रतीसारभरितचेता अभवत्। अतो युधिष्ठिरमुखेन महाकवि र्भारविराह —

सहसा विदधीत न क्रिया मविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥

न युक्तं कूपखननं संदीप्ते वह्निना गृहे

— श्री आ. वरदराजन्, न्यायशिरोमणिः

लोकव्यवहारे बहूनां सूक्तिरत्नानां प्रचारः प्रसारश्च भृशं दृश्यते। परंतु पृथिव्यां वर्तमानानां अस्मादृशां तदुपादानं परीक्ष्यैव कर्तव्यम्। रत्नानां संग्रहं न कोऽप्याक्षिपति। अपितु कर्तव्या परीक्षा। रत्नहारी तु पार्थिवः अपरीक्ष्य अविमृश्य वा गृह्णन् वञ्चितो भवेदित्यांशका जागर्त्येव। परीक्षा पुनः देशकालस्थितिगती रनुरुध्य कार्या। तत्वपरीक्षायां प्रवृत्तायां रत्नानां

8

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तदाभासानां अथ रत्नानामपि वा मध्ये उत्कर्षापक
निष्कर्षे अधिकारितारतम्येन परिग्रह स्संभवति। किन्
लोकव्यवहाराय प्रवृत्ति - निवृत्ती अत्यन्तमपेक्षिते। इ
प्रवृत्ति रनिष्टा न्निवृत्तिरित्यस्ति लोके रीतिः। तद
विविधा धर्माः, नानाशास्त्राणि, बहूनि सुभाषितानि
प्रवर्तन्ते। श्रुतयः स्मृतयो वा पुराणानि चरितानि
सर्वाण्यपि सुभाषितानामेव स्वभावानुभावाऽऽदिसिद्धा
रूपान्तराणि। अत स्तेषां तादृशानां वा प्रभावः ज
मनस्सु वरीवर्ति। एवं विधिनिषेधाऽऽत्मकानां सुभाषिता
लोकस्थिते रनुकूलायां प्रवृत्तावेव तात्पर्यमन्ततो गत्व
विधिरूपं प्रत्यक्षतः प्रवर्तकं चेत् निषेधात्मकं अनिष्टान्निवृ
सम्पाद्य विधौ प्रवृत्ते रानुकूल्यं सम्पादयति। अतः क
ञ्चित् निषेधाऽऽत्मकानामपि पर्यालोचन मावश्यकमेव।

इदं सुभाषितं व्यर्थप्रयत्ने प्रवृत्तस्य निवर्तनपरम्
गृहदाहे संभवति तत्क्षणकर्तव्यः तच्छमोपायः, नो चे
स एवाग्निः निकटस्थान्यपि गृहाणि दग्धुं प्रवर्तते। गृ
लग्नस्य आशुशुक्षणेः प्रशमने मृद्वारिबाष्पप्रयोगाऽदि
तत्क्षणकर्तव्यं भवति, न तु कूपखननं जलसम्पादना
युज्यते तदात्वे। तदाह 'नयुक्तं कूपखनन' मिति
विलम्बे सति हि सन्दग्धं गृहं गेहपतेर्नष्टं कष्टं च जन
यति। तथाऽन्यगृहस्थानप्युपतापयति। अतस्सत्वरं का

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

साधनोपायाऽश्रयणमेव वरीय इति सिद्धम्। दह्यमाने गृहे कूपं खनित्वा वारिसम्पादनं, युद्धाऽऽरम्भे शस्त्राभ्यासं ज्ञापयति। प्रवृत्ते शस्त्रसम्पाते शस्त्राभ्यासं कुर्वन् बालो वा बालिशो वा स्यात् नतु वीरस्सुवीरो वा। समयज्ञता समयस्फूर्ति स्सत्वरप्रवृत्तिश्चे त्येतत्कर्मवीराणां लक्षणम्। समयज्ञो हि तत्समये सिद्धोपायैः कार्यं सम्पादयति। न विलम्ब्य फलप्रदानुपायाननुधावति, न वा कार्यनाशदर्शिनः क्रियाकलापान्। साध्यसाधनप्रसंगो हि अव्यवधानमपेक्ष्यते। साध्यसाधने उपायस्य आचरणं प्रशस्यते। कार्यसम्पत्तिः कारणकलापस्य विरहं विलम्बं वा न सहते। दग्धे गृहे पश्चात्सम्पादितमुदकं किमर्थकं स्यात्? अतः प्रत्युत्पन्न-मतिब्रूते "न युक्तं कूपखननं संदीप्ते वह्निना गृहे" इति।

पूर्वोक्तं सुभाषितं न केवलं गेहे पर्यवस्यति अपितु देहे देशे च। नीरोगः दृढगात्रः गृही देशस्योत्तमनेता स्यात्; अधिनायकश्च स्यात्। नित्यरोगिणो भोगभाग्याऽ-दिकं न मुदे, तथा कलहिनो नित्यशङ्कितस्य वा गृहं, गृहं न भवति। किन्तु वनम्। देहस्य रोगोऽनलः, गेहस्य कलहोऽनलः, देशस्य अन्तःकलहोऽनलः। रुग्णस्य शान्ति-रलभ्या। गेहे अधिकप्रजोत्पत्त्या गृहजीवनमपि विधुरं भवति। यदि देशे पुनरन्तःकलहो जायते तर्हि देशीयाभि-वृद्धि निरुद्धा स्यात् तृतीयस्य च लाभो भवेत्। सच

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनलविशेषः सिद्धोपायैरेव प्रशाम्यः नतु साध्योपायैः। कूपखननं विलम्ब्य फलप्रदं साध्योपायं जलसम्पादनं रूपयति, अतस्तन्नोपयुज्यते दह्यमाने गृहे। पूर्वसम्पादितेन मृद्वारि-बाष्पादिना गृहदाहः प्रशाम्येत। अनयैव रीत्या आपत्काले धर्माधर्ममीमांसया वृथाकालयापनं नोपयोगि। आर्तस्सन्नातुरस्सन् वा आपदि यद्यत्करोति तत्तदापद्धर्मत्वेन परिगण्यते। आपद्धर्माणां तथा विविधप्रायश्चित्तानां च प्रसंगः अस्मद्भारतीयसंस्कृतेः अनूचान मौदार्यं स्मारयति। सत्कार्यसाधनाय सता वा असता वा मार्गेण प्रवर्तन्ते मानवाः। कर्मवीराणां गतिरन्यादृशी लोके। आपत्सु विशेषधर्माणां उपेक्षा न पापाय भवति। अस्ति तस्यापि प्रायश्चित्तप्रकरणं सामान्यधर्माऽचरणेन सर्वस्सम्मान्यत एव। तदेव सामान्यजनानीकस्य श्रेयस्करम्। अतोऽरिष्टनिरसनाय अविलम्ब्यफलप्रदं उपायं आश्रयेत्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कर्तव्यमेव कर्तव्यं प्राणैः कण्ठगतैरपि

— श्रीमान् तट्टा नरसिंहाचार्यः

विदितचरमेव ह्येतत्सर्वेषामपि विदुषां यत्, अहित-निवृत्तिपूर्विका हितप्राप्तिप्रयोजना च धर्मसंसेवा कर्तव्या सर्वैर्मानवैरिति । को नामायं धर्मः ? किमस्य मूलम् ? किं प्रयोजनोऽयं ? इत्येतेषां प्रश्नानां समाधानं प्रथमतो देयं भवति । "वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः," स च विधिनिषेधरूपः । "सत्यं वद," "धर्मं चर," "स्वाध्यायान्मा प्रमदः" इत्येवं रूपः । वेद्यते ज्ञायतेऽनेन धर्मस्वरूपमिति करणव्युत्पत्त्या वेदशब्दः मन्त्रब्राह्मणाऽऽख्यं ग्रन्थराशि मभिधत्ते । स च वेदो ऋग्यजुस्सामभेदेन त्रिधा भिद्यमानस्त्रयीति व्यवह्रियते । गुरुपरम्परया श्रवणमेवैतेषां वर्तत इति श्रुतिरिति च पण्डितसमाजे व्यवहारः समजनि । अथर्ववेदेन सह चत्वारो वेदाः धर्मस्य मूलं भवन्ति । वेदवच्छास्त्राणां इतिहासपुराणाऽदीनां काव्यानां च धर्ममूलत्व मुररीकृतं सुधीभिः । अतो वेदाः, शास्त्राणि, इतिहासपुराणाऽऽदयः, काव्यानि च विहितकर्मणां कर्तव्यतां, निषिद्धकर्मणो निराकरणं च बोधयन्ति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

काव्यात् कर्तव्यताधीः सरसा, अन्यत्र न तथा। यथा कामिनी, कटाक्षवीक्षणाऽऽदिविलासैरेव कामिनमावर्जयन्ती, ममेद मभिलषितं कुरु, अनभिलषितं मा कुरु इत्यनुक्त्वैव सर्वं सम्पादयति, तथा काव्यश्रीरपि सहृदयहृदयाह्लादकारिणा व्यञ्जनाव्यापारेणैव रामाऽऽदिवद्वर्तितव्यं न रावणाऽऽदिवदिति पुंसः कर्तव्ये प्रवर्तयति निवर्तयति चाकर्तव्यात्।

मानवै स्सर्वैरपि धर्ममार्गगामिभि र्भवितव्यम्। वेदविहितानामखिलानामपि धर्माणा माचरणे अवश्यकर्तव्येऽपि विद्यार्थिनां उपयोगाय केवलं कतिचन धर्मानत्र निर्दिशामः।

आद्यन्तशून्यस्य, निखिललोककारणस्य पुरुषोत्तमस्य देवदेवस्य पूजा सर्वैरपि कर्तव्या। स च सकललोकाध्यक्षः। तदाज्ञयैव वायुर्वाति, सूर्यः प्रकाशते, मेघो वर्षति विश्वम्भरा च सस्यसम्पन्ना भवति। किं बहुना, विना तदाज्ञया तृणमपि न चलति। पुरुषोत्तमसदृशा गुरवोऽपि पूजनीयाः। ये खल्वज्ञानं निरस्य, विद्यां प्रदाय, भयाऽऽहारनिद्रामात्रवेदिभ्यः पशुभ्यो भेदं जनयन्ति। पूज्यपूजां ये न कुर्वन्ति ते न खलु श्रेयसां भाजनं भवन्ति। पुरा किल मनुवंशकेतु र्दिलीपो नाम राजा शक्रमुपस्थाय दिवो भुव मागच्छति स्म। धर्मलोपभिया ऋतुस्नातां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भार्यां मनुस्मरन् अचिरप्रसूतां कल्पवृक्षच्छायामाश्रितां प्रदक्षिणक्रियार्हां कामधेनुमप्रदक्षिणीकृत्यैव निजराजधानी मगात्। स्वमनाराधयते तस्मै कुपिता कामधेनुः 'विना मत्प्रसूतेराराधनेन ते प्रजा न भवे' दिति शापं दत्तवती। तेन शापेन स चिरमनपत्यो भूत्वा, तन्नयनानन्दिनीं नन्दिनी-माराध्य वंशकर्तारं कीर्तिमन्तं च तनयं रघुनामानं सुदक्षि-णायां लेभे। अत एव कविकुलतिलकेन कालिदासे नाभिहितं — 'प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यति-क्रमः' इति।

सन्ति खलु मानवे शरीरं बुद्धि रात्मा चेति त्रयो भागाः। यद्यपि व्यायामादिना निजशरीरं पोषयन्तो जनाः मांसला दर्शनीयाऽऽकृतयश्च भवन्ति, तथाऽपि बुद्धि-बलराहित्येन पशुसहोदराः कथ्यन्ते। आत्मानमुपेक्षमाणा ये बुद्धिं परां पुष्टिं नयन्ति ते राक्षसा इत्याख्यायन्ते। ये च शरीरं बुद्धिं च निजवशे निधाय आत्मगुणानपि पुष्णन्ति ते खलु महात्मान इत्यभिधीयन्ते। तादृशा महात्मानः तत्र तत्र लोके विरला दृश्यन्ते। को महानिति प्रश्ने — धवलदेहः सालप्रांशुः व्यूढोरस्कश्च पुरुषो न भवति महान्। कृशशरीरोऽपि विदितसकलशास्त्रः सकलकलाकुशलोऽपि आत्मगुणरहितः पुरुषो न भवति महान्। अनधीयानोऽपि दयाशौचसत्यक्षमाऽऽद्यात्मगुण-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सनाथ एव महानिति वक्तुं शक्यते। अत एव संस्कार-रहितेनापि पुरुषेण दयाशौचाऽदिक मात्मनो गुणाष्टक मुपार्जनीम् ।

दया नाम परहितचिन्तनम्। तदात्वे व्यथाजनकमपि यदुत्तरकाले सुखजनकं तदुच्यते हितमिति । प्रियं नाम तात्कालिकप्रीतिजनकमपि यदुत्तरकाले दुःखजनकम् । मानवैस्सर्वैरपि प्रियं हितं च यद्भवति तदेव वक्तव्म् । प्रियमहितं न सन्तुष्टिं जनयति आयतौ बाधाजनकत्वात् । अप्रियमहितं न मुदे कल्पेत। उभयथाऽप्यश्रेयस्करत्वात् । प्रियं हितं च यद्भवति तदेव कथनीय मादरणीयं च । तादृशं प्रियहितं दुर्लभं खल्वस्मिन् महीतले। अत एवोक्तं भारविमहाकविना "हितं मनोहारि च दुर्लभं वचः" इति। अत एव —

"अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः। इति

"सत्यं ब्रूयात्प्रियं ब्रूयात् न ब्रूया त्सत्य मप्रियम् ।
प्रियं च नानृतं ब्रूया देष धर्मः सनातनः ।।"

इति प्राचीनोक्ती संगच्छेते। यः खल्वात्मना समं सर्वेषु भूतेषु दयां प्रदर्शयति स दयालुरिति कथ्यते। तादृशः पुरुष इह लोके सर्वैः स्तूयमानो महतीं कीर्तिं लब्ध्वा परत्र स्वर्गसुखान्यनुभविष्यति। पुरा सिंहोरुसत्त्वः पुरुष-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सिंहो दिलीपः सिंहेन हन्यमानां गां रक्षितुकामः स्वदेह मामिषपिण्डमिव क्रूरसत्त्वाय सिंहाय समर्प्य धेनोः प्राण-रक्षण मकार्षीत् । औशीनरः शिबिर्नाम कश्चिद्राजा नृशंसेन श्येनेन हन्यमाने, अतिकरुणमाक्रन्दति कपोत-कपोतके सञ्जातकरुणः स राजा कपोतप्राणत्राणाय श्येनस्याऽऽहारदानाय च स्वशरीरा न्मांसमुत्कृत्योत्कृत्य यावदेकस्यां घटायां न्यक्षिपत्, तावत् कपोताधिष्ठितां अन्यां घटां नम्रां दृष्ट्वा स्वयमेव घटायां न्यविक्षत् । तदा तुष्टा देवाः पुष्पाण्यवर्षन् । दुन्दुभिध्वान मकुर्वन् । श्येनकपोतौ च इन्द्राग्न्यो रूपे आस्थाय अभीप्सितान् वरान् महाराजाय दत्वा यथागतं जग्मतुः । किं बहुना, जीमूतवाहनो नाम कश्चिद्विद्याधरः प्राज्यं राज्यं परित्यज्य गुरुशुश्रूषार्थी वनं गत्वा, तत्र मलयवतीं नाम सिद्धसम्भवां कन्यामुपयेमे । ततो दशदिनाभ्यन्तर एव विहङ्गराजेन हन्यमानं नाग-राजेन प्रेषितं नागकुमारं त्रातुकामः स्वप्राणा नर्पितवान् । अनेनैतत्सुव्यक्तं भवति यत् प्राणैः कण्ठगतैरपि प्राणिनां रक्षण मवश्यकर्तव्यमिति ।

आत्मगुणेष्वन्यतमो गुणः क्षमा नाम । यया विना क्रियमाणान्यपि महान्ति तपांसि भवन्ति निरर्थकानि । अत एव युक्तमुक्तं बाणेन — "क्षमा हि मूलं सर्वतपसां" इति । उत्तरस्मिन् काले भृशमिय मुपकरोति । अत

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एवेदं वचो न व्यभिचारि यत् — "न तितिक्षा सममस्ति साधनं।" यश्च क्षमावान्नभवति, तस्य कार्याणि न सिध्यन्ति।

गुणेषु दोषाऽऽविष्करण मसूया। तया विरहित: पुरुष अनसूयुरिति कथ्यते। स च समस्तभोगभाजनं, पुण्यवतां निवासं श्रेयसां निधानं स्वर्गाभिधानं धाम लब्ध्वा नि:सीमान मानन्दं लभते। अकार्पण्यं नाम दैन्येन विना जीवनम्। केचित्तु धनवन्तोऽपि यथाशक्ति धनसव्ययन्तो दुर्गतेभ्योऽपि हीनां दुर्गति मनुभवन्ति। अत एवोक्तं — 'सति विभवे न जीर्णमलवद्वासा: स्यात्। न रक्त मुल्बण मन्यधृतं वा वासो बिभृयात्' स्पृहानाम परेषां वस्तुषु लिप्साभाव:। ये खल्वस्पृहासहिता भवन्ति ते स्वजीविते बाधां नानुभवन्ति। परेषा मुत्कर्षं वीक्षितुं ते शक्नुवन्ति। न कस्याप्याज्ञावशवर्तिन: ते भवेयु:। राजान मीश्वरमपि वा ते तृणाय मन्येरन्। अत एवोक्तं विशाखदत्तेन — 'निरीहाणा मीश स्तृणमिव तिरस्कारविषय:' इति। अतस्सर्वैरप्यात्मगुणसम्पन्नै र्भवितव्यम्।

सत्यवादी सर्वै: पूज्यते। अत एव औपनिषदी सरस्वती 'सत्यं वद' 'धर्मं चरे'ति मुक्तकण्ठ मुद्घोषयति। सत्यवचनेन कीर्तिप्रतिष्ठे लभ्येते। सापराधोऽपि पुरुष स्सत्यवादेन बन्धना न्मुच्यते। प्राणा अपि च रक्षन्ते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सुखं च प्राप्यते। पुरा हरिश्चन्द्रो नाम कश्चिद्राजा विश्वामित्रेण बहुधा पीड्यमानोऽप्यसत्यं नावदत्। 'अखिलमपि राज्यं दातु मिच्छामि नैवासत्यं वच्मी' त्युत्तरं दत्त्वा असत्यवादिनं राजानं कर्तुं यतमानाय गाधेयाय राज्यं सर्वं ददौ। भार्यां पुत्रं स्वं च विक्रीय महतः क्लेशा ननुभूय सत्यसन्ध इति कीर्तिं लेभे। व्याघ्रः कस्मिंश्चिदरण्ये तृणानि चरन्तीं गां दृष्ट्वा हन्तुमुद्यतः। गौश्च स्वतर्णकस्य मुखं वीक्षितुं पयो दातुं च सदयं तं घातुक मर्थितवती। अङ्गीकृतं च तद्वचनं तेन। गृहान् गत्वा स्वतर्णकाय पयो दत्वा 'व्याघ्राय आहारो भवामि। वत्सश्चाय मविदितलोकः। रक्षतेमं' इतीतराभ्यो गोभ्यो निवेद्य स्ववत्साय नीतीरुपदिश्य व्याघ्रसमीपं जगाम। दयायत्तचित्तः स व्याघ्रोऽपि सत्यवादिनीं तां गामभ्यमुञ्चत्। एवं कदाचित् प्राणा अपि रक्ष्यन्ते।

कृतज्ञते त्यपरो गुणः गुणानामुत्तमः। उत्तमगुणै स्सर्वै रभ्यर्थनीयश्च। कृतं जानातीति कृतज्ञः तस्य भावः कृतज्ञता। कृतज्ञता च परैः कृतस्योपकारस्य अविस्मरणं। कृतज्ञतारहितः पुरुषः कृतघ्न इति व्यपदिश्यते। स चैवं निन्द्यते। 'मित्रद्रोही कृतघ्नश्च यश्च विश्वासघातुकः। त्रयस्ते नरकं यान्ति यावच्चन्द्रदिवाकरम्।' अचेतनश्च कृतज्ञोऽप्येव मभिनन्द्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रथमवयसि पीतं तोयमल्पं स्मरन्तः,
शिरसि निहितभारा नारिकेला नराणाम् ।
सलिलममृतकल्पं दद्युराजीवितान्तं,
न हि कृतमुपकारं साधवो विस्मरन्ति ॥

ततो जगत्यामस्यां कीर्तिप्रतिष्ठे लब्धुकामैः सर्वैरपि मानवैः धर्मसंग्रहः अवश्यं कर्तव्यः ।

मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः

— विद्वान्, शिरोमणि वै. मल्लिकार्जुनराव,
पि. ओ. यल्.

सकलवैभवानां आस्पदे महति ऐश्वर्ये विद्यमानेऽपि यस्य पुरुषस्य मनसि परितुष्टिः न जायते स पुरुषः धनिकोऽपि दरिद्र एव भवति । यश्च पुरुषः यदृच्छाप्राप्तेन अल्पीयसाऽपि भाग्येन नित्यसन्तुष्टः निरपायं जीविकां निर्वहति स पुरुषः दरिद्रोऽपि अर्थवानेव भवति । अतः आत्मपरितुष्टिरेकैव प्रभूतस्य ऐश्वर्यस्य निदान मित्यवगम्यते ।

लोके मानवा स्सर्वेपि ऐश्वर्यकामुका भवन्ति । न कदाऽपि कोऽपि जनः दारिद्र्य मभिलषति । तथाऽपि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पुराकृतं सुकृत मनुसृत्य कतिपयमानवाः भाग्यवन्तो भवन्ति । दुष्कृत मनुसृत्य कतिपयमानवाः दरिद्राश्च भवन्ति ।

अर्थवतः पुरुषस्य दुरधिगमान्यपि वस्तूनि सङ्कल्पमात्रेण हस्ताभ्याशमुपयाति । सस्यश्यामलेषु क्षेत्रेषु आरामेषु वा यदि अभिलाषः अचिरेणैव तत् सम्पादयति । गृहेषु दारेषु वा यदि मनः प्रवर्तते सद्य एव कृतार्थो भवति। असंख्येषु दासदासीजनेषु यदि वाञ्छा जायते तत्रापि आशु कृतकृत्यो भवति । एवं धनकनकवस्तुवाहनाऽदिषु यदि चित्तं प्रवर्तते तत् सर्वं तस्य सिध्यति । परन्तु किं तेन कृतं स्यात् । इत्थ माशापाशनिबद्धचित्तः एकैकशः विविधानि भोग्यवस्तूनि निरवधिक महरहस्सञ्चिन्वन्नेव कालं यापयति । न कदाऽपि तस्य पारं दृश्यते । न कदाऽपि तस्य तुष्टिरुत्पद्यते । न कदाऽपि तस्य आनन्द स्संजायते ।

कति वा न सन्ति लोके श्रमोपजीविनः पुरुषाः । सर्वेऽपि ते अनुदिनं कायकष्टार्जितं प्रतिफलमनल्पं मन्यमानाः सुखेन जीविकां निर्वहन्ति । बुभुक्षया यवागूं अमृतप्रायमापिबन्ति । जलोदनं परमान्नमिव भक्षयन्ति । जीर्णाम्बराणि दुकूलानीव बहुमन्यन्ते। तरुमूलेषु शयावाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सौधवासमनुभवन्ति। यदृच्छया उपागतान् शुनकाऽदीन् बन्धुप्रेम्णा सभाजयन्ति। त एव पुरुषाः सुखेन शेरते। त एव धैर्येण वर्धन्ते। त एव च निश्चिन्ता भवन्ति। त एव च भाग्यवन्तो भवन्ति।

यद्यपि लोके सुखाऽऽधायकानि भोग्यानि वस्तूनि बहूनि विद्यन्ते। तेषा मधिगमने प्रयत्नोऽपि मानवानां निसर्गत एव भवति। परन्तु न कोऽपि पुरुषः जगति कृत्स्नं भोग्यजात मधिगच्छति। अत एव धनाऽऽढ्यस्य अपत्येष्वनुरागः, वदान्यस्य द्रव्येष्वभिलाषः, शीलवतः वैदुष्यसंपादने प्रयत्नः, विचक्षणस्य विनये अभिनिवेशः, सुभगस्य रूपवत्या मनुरागः, अर्थवतः पुरुषस्य आरोग्य-सन्निवेशः वाञ्छनीयतया दृश्यते। अत एवोच्यते "असन्तुष्टो जनो नष्टः सन्तुष्टः सुखमश्नुते" इति।

किञ्च, सन्तुष्टस्य जनस्य मुखं सर्वदा प्रसन्नतया दृश्यते। वागपि परिशुद्धा भवति। चेष्टा तु निरुपद्रवा भवति। अतस्तस्यैव पुरुषस्य समाजे विकासः सभाया मादरः, ग्रामे बहुमानश्च भवति। सन्तोषाभावे तु धनिक-दरिद्रौ उभौ अपि तुल्यौ भवतः। न काऽपि भेदः तयोः वक्तुं शक्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कालो हि बलवत्तरः

— पावै प्रवचनभूषणं एन्. एस्. ताताचारी,
शिरोमणिः, हिन्दी प्रचारकः

नैवाऽऽकृतिः फलति नैव कुलं न शीलं,
विद्याऽपि नैव न च यत्नकृताऽपि सेवा ।
भाग्यानि पूर्वतपसा खलु सञ्चितानि,
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥
(नीतिशतकम्)

नेदन्नाम न विदित मीक्षावतां, यत् निखिलेऽस्मिन् भुवनवलयेऽप्यनन्ते अचिन्त्या अनिर्वाच्या च काचन शक्तिः भूतानि सर्वाणि यन्त्राऽऽरूढानीव भ्रामयति । न तत्र शास्त्रं सङ्गच्छते । न युक्तिः युनक्ति । न साधन-संपत्तिः साध्नोति । नापि कौशल मनुकूलयति । विचार-विशारदाः विवेकिनः तामेव शक्ति 'काल' इत्यभिदधते । स एव कालः सर्वापेक्षया बलवत्तरः । पंगुं लङ्घयते, मूकं वाचालयति, जडं जल्पाकयति । तस्यैव भाग्यं दिष्टं इत्यादि नामान्तरम् । सूत्रे मणिगणा इव तस्मिन्नेव कालतन्तौ सर्वः जीववर्गः संग्रथितः वर्तते । तस्य प्रसादे परं सर्वमसमत्साधनं साधीयो भवति । तस्य तु वैमुख्ये प्रयत्नः निष्फलता-नरसमेषां विद्या विफलतां भजते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मयते । चातुर्यं शैथिल्य माप्नोति । सारासारनिरूपण-निपुणानां इदं रहस्यं करतलाऽमलक मायात् । इदं च प्रत्येकमनुभवैकवेद्यं भवति । पुराणेतिहासाऽऽदीनां तत्व-संशोधने कृतेऽपि अयमेवार्थः निष्पद्यते । अनन्तगुण-रत्नसागरः पुरुषोत्तमः श्री राघवः स्वजन्मनि कियद्वा कष्ट मन्वभवत् ! रामः "दुःखसंवेदनायैव रामे चैतन्य मर्पितं" इत्यन्वशोचत् । अपासुलानां धुरि कीर्तनीया जनकनन्दिनी कीदृशीं वा वेदनामलभत ! तावद्दुःख मनुभवितुं तयोः कमपराधलवं वयं पश्यामः । कालस्य कोलाहलं विना किमन्यदत्र कारणम् ? तावेव कालदेवतायाः हस्ते लीला-रविन्दायितौ चेत्, अस्मासु का कथा ! उत्तररामचरिते भवभूतिः 'यदि सीतापि दुःखार्ता कालो हि दुरतिक्रमः' इति स्वसंवादं ददौ । किञ्च धर्मदेवताप्रतिरूपस्य धर्मपुत्रस्य धार्मिकता कालदेवताया स्समीपे कान्दिशीकतां गता । पर्वतप्रतिभटप्रभावशालिनः भीमस्य बलमपि कालदेवतायाः अग्रे पातालतले परिक्षिप्तम् । विश्वविख्यात-विजयिनः विजयस्य पराक्रमः कालदेवतायाः पुरतः भस्म-सादभवत् । नकुलसहदेवावपि कालदेवताऽनुग्रहविधुरौ वात्याहतपोताविव अभूताम् । तस्मादेव कुन्ती सुभद्रां प्रति "भाग्यवन्तं प्रसूयेथाः मा शूरं मा च पण्डितं" इत्येवाऽऽ-शिषं प्रयुयुजे । केन वा कुवलयकालरात्रिः रावणो निहतः ? दिगन्तविश्रान्तयशाः वाली वा केन हतः ? कथं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वा भीष्माऽऽदयः कदलीलाव मच्छिद्यन्त? शतं समाः संभूय समालोच्यमानेऽपि एषां विषये कालं विना नान्यत् कारण मित्येवावशै रस्माभि र्वक्तव्यम्। अस्मिन्नर्थे "कालः पचति भूतानि" अहो दैवगतिश्चित्रा, बलीयसी केवल, मीश्वरेच्छा, कालस्य कुटिला गतिः, विधेः वामः पन्थाः, कालः क्रीडति, इत्यादीनि प्राचां वचांसि प्रादुरभवन्। ईश्वरेच्छामपि कालशब्देन केचित् व्यवाहरन्।

कालस्तु ईश्वरवदनादिः। ऋतुः सुदर्शनः काल इति सहस्रनामपद्ये विष्णौ, 'कालो हि भगवान् देवः स साक्षात् परमेश्वरः' इति चान्यत्र परमेश्वरे च कालशब्दः प्रयुक्तः परिदृश्यते। 'कलयति आयुः' इति 'दिवसगणना-विशेषं, कालयति प्रेरयति सर्वाणि भूतानि' इति दिष्टापर-नामधेये पुरुषभाग्यविशेषे च विपश्चितः तस्य व्युत्पत्तिं कुर्वन्ति। कोषाऽऽदिषु कालशब्दस्य यमः, दिष्टं, कृष्ण-वर्णः कालपरिमाणविशेषः, शनैश्चरः, पर्वतविशेषः, कोकिलः, इत्यादयोऽर्थाः कथ्यन्ते। "कालो हि बलवत्तरः" इत्य-स्मिन् वाक्ये कालशब्दः दिष्टार्थकः इत्येव सांप्रतम्। समयविशेषो वा। मनाक् मन्यमाने चतुर्विंशतिघण्टा-परिमितः कालविशेषोऽपि स्वयमावर्तमान एव भुवनं सर्वं मावर्तयति। पाश्चात्यविद्यापरिपचेलिमसमानसाः अर्वाचीनाः केचित् दिष्टे श्रद्धां न कुर्वते। अपथप्रवृत्ति-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वारणाय, मनस. शान्तिसम्पादनाय च केवलं दिष्टं दैवमिति वदन्तः पूर्वतनाः पुनःपुनरस्मान् प्राबोधयन्निति च अद्यतनाः मनीषिणो मन्यन्ते। मतिरेव विधेः गरीयसीत्येव तेषां रूढमूलो विस्रंभः। तेषां च मध्ये केचित् दिष्टे विस्रंभं भजतः महतः "श्रद्धाजडाः" इत्यवहेलयन्ति। पुरुषप्रयत्ने पुष्कले सत्यपि फलोत्पत्तौ विसंवादं विश्वतः विलोकयतां तेषां अवहेलनाऽऽलापाः कथं संगच्छन्त इति न ज्ञायते। तथाहि "यः कश्चित्, सौख्यहेतोः त्रिजगति यतते नैव दुःखस्य हेतोः, इति तुल्यं कर्षन्ति पृथिवीं तुल्यं शास्त्रा ण्यधीयते। उन्मज्जन्ति निमज्जन्ति देवस्यैकस्य चेष्टया" इति च प्राचां वाचः स्मर्तव्याः। ब्रह्माऽऽदि स्तम्बपर्यन्तं सर्वं प्रकृतिमण्डलं, करकलितकन्दुक इव तरङ्गताडिततृणमिव मारुताऽहतमेघ इव, वेगवेल्लितचक्रमिव कालाधीनं बभ्रमीति। तथाहि "कालः सृजति भूतानि कालः संहरते प्रजाः। कालः स्वपिति जागर्ति कालो हि दुरतिक्रमः" इति मान्यानां महता मुक्तिः। दैवं निहत्य कुरु पौरुष मात्मशक्त्या" इति क्वाचित्कं वचनं प्रयत्नपराङ्मुखानां वृथैव कालं यापयतां तन्द्रालूना मुत्थानोत्तम्भकार्य मेवेति प्रतीमः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्षमाखड्गः करे यस्य दुर्जनः किं करिष्यति

व्याकरणशिरोमणिः विद्वान्,
राष्ट्रभाषाविशारदः, संस्कृतान्ध्रपण्डितः
जीरेड्डि बालचेन्नारेड्डिः

यस्य पुरुषस्य हस्ते क्षमारूपः खड्गोऽस्ति, न कोऽपि दुर्जनः तस्मै किञ्चिदप्यपकर्तुं शक्नोतीति शीर्षिकयोपलभ्यमानः साधारणोऽर्थः। वस्तुतः क्षमाया आत्मधर्मत्वा दमूर्तपदार्थतया तस्याः खड्गवत्करेण धार्यमाणत्वं न सम्भवति, तथाऽपि शत्रुविजयसाधनप्रसिद्धखड्गधर्मस्य तस्या मारोपितत्वात् गौणतया तदनुसन्धेयम्। अतो यः पुरुषः क्षमाशीलो भवति, अर्थात् — परकृतै रथवा स्वयंप्राप्तैरुपद्रवाऽदिभि र्निर्विकारचित्त स्सदा वर्तते तं न कश्चित् दुर्जनः किञ्चिदपकरोतीति तात्पर्यार्थः। अयञ्चादर्शो महानुज्ज्वलः, अनुवर्तनन्त्वतीव कठिन मसिधाराव्रतकल्पञ्च। सृष्टयां सर्वे मानवाः, मानवा इत्येव किं, सर्वेऽपि पदार्थाः प्रतीकारविधा वहमहमिकतया वर्तन्ते। चलितेन्धनोऽग्नि र्ज्वलति, पादाहतं रजः मूर्धान मधिरोहति। तथाऽपि 'एको विवेको ह्यधिको मनुष्ये' — इत्युक्तरीत्या मानवः सृष्टया मुन्नतः शिरोभूषणप्रायश्च। अतो मानव एव कलुषवासनापटलं दूरीकृत्य इन्द्रियाणि निरुध्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

महान्त मिम मादर्शं परिपालयितुं शक्नोति । पाशविक-तुच्छप्रतीकारवाञ्छा तु सृष्टिशिरोभूषणाय विवेकमण्डि-ताय मानवाय शोभां न हि पुष्णाति । अपि च सः प्रतिचिकीर्षुः नररूपो राक्षस इत्येव वक्तुमुचितः । बहु-जनपीडनेन बहूनां हननेन वा कश्चिच्छूरो विजयी संपद्यते। कुटिलभावोद्धतिं तिरस्कृत्य क्षमाशीलतया यस्तिष्ठति स एवाऽऽत्मान मुद्धरति, परांश्च तारयति, धीरः लोकत्रयजेते-त्यपि च प्रशंस्यते । तदुक्तम् —

"कान्ता - कटाक्ष - विशिखा न खनन्ति यस्य,
चित्तं, न निर्दहति कोपकृशानुतापः ।
कर्षन्ति भूरिविषयाश्च न यस्य चित्तं,
लोकत्रयं जयति कृत्स्नमिदं स धीरः ॥"

इति, सर्वैर्भारतीयै रादर्शरूपतया जेगीयमानगुण-गणस्य भगवदवतारस्य श्रीरामचन्द्रस्य महनीयतायाः कारणं तदीयविशुद्धक्षमाशीलतैव । राजमकुट मुत्सृज्य वनवासाय विमात्रा कैकेय्या निर्दिष्टोऽपि सः कीदृश-क्षमाशीलतया प्रत्यब्रवीत्, पश्यन्तु —

"वनभुवि तनुमात्रत्राण माज्ञापितं मे,
सकल - भुवन - भारः स्थापितो वत्समूर्ध्नि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तदिह सुकरताया मावयो स्तर्कितायां
मयि पतति गरीयानम्ब! ते पक्षपातः ॥"

"भीतो भूभरतः किमम्ब! भरतः? किं वा वनात्पावनात्
त्रस्तोऽहं? सगरान्ववायककुद स्तातः कुतश्शोचति?
दिव्याया स्सरितो निवापकरणा ल्लब्ध्वीं प्रतिज्ञामिमा-
मावाभ्या मभिपूरयिष्यति न चेत्पुत्री कथंस्या द्वयम्?"

यदि प्रपञ्चचरित्रं पश्यामः, एतादृक्क्षमागुण-शोभिताः, अत एवाऽऽचन्द्रार्ककीर्तिकाया महापुरुषा बहवो लभ्यन्ते । एसुक्रीस्तु - सोक्रटीस् प्रभृतय स्तादृशा एव । भारतभाग्यविधाता, भारतजातेः पितृत्वेन पूज्यमानः, आधुनिकयुगपुरुषः, महात्मा गान्धिः साक्षात् क्षमाया आकार इत्यपि वक्तुं शक्यते । स्वक्षमयैव स महात्मा आंग्लसाम्राज्यं विनिर्जित्य भारतदेशं स्वतन्त्रं पर्यकल्पयत् । प्रथमतो भारतजातेः पीडका आंग्लेया अद्य हृदयपरिवर्तनेन मित्रभाव मापन्नास्सन्तः, अस्मद्देशपञ्चवर्षीययोजनासु श्रद्धालव स्साहाय्यकर्तारश्च समभवन् । दुर्गापुर्यादिषु अयःकर्मागारादयश्च तैरेव प्रतिष्ठापिताः ।

अनया क्षमया लाभै स्साकं कतिचित् कष्टान्यपि सन्ति । क्षमाशीलं पुरुषं लोकः प्रायशो दुर्बलं मनुते । तदुक्तं भर्तृहरिणा — 'क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजात' इति । किञ्चायं पुरुषो विपद्भिः परिभूत-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्तिष्ठति। प्रारम्भावस्थायां पदे पदे दुर्जनकृतः पराभवो निस्सीमतया सोढव्यो भवति। तदर्थं क्षमावता पुरुषेण विशिष्य निरभिमानिता स्वीकार्या स्यात्। यद्यपीय-मवस्था चिरकालं न हि तिष्ठति। क्रमशो लोक स्तदीय-माहात्म्यं विजानाति, गौरवं ददाति पूजयति च। अप-कर्तारोऽपि क्षमां याचमानाः पश्चात्तापं प्रकटयन्ति।

परन्त्वियं क्षमा सांसारिकवासनावासितानां न सुलभा। पुण्यपरिपाकेन भगवद्भक्त्यैव च सा लभ्यते। 'तेजः क्षमा धृतिश्शौच' मित्यादिना गीतायां क्षमा आत्म-गुणेषु परिकीर्तिता। क्षमायाः पराकाष्ठैव शान्ति रित्युच्यते।

'स शान्तिमधिगच्छति।'

'शान्तिं निर्वाणपरमां मत्संस्था मधिगच्छति।'

इत्यादिभगवद्गीतावचनै स्तस्याः भगवदभिन्नत विस्फुटं प्रतिपादिता। ईश्वरप्राप्तेरेव मानवजीवित-लक्ष्यत्वात् तत्स्वरूपा क्षमा नितांत माराध्या प्राप्या च॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आशा

— श्रीपाद लक्ष्मीनारायणशास्त्री

'आशा, इत्ययं शब्दः' 'आशा नाम, मानसविकार-रूपः कामनापरिणामविशेषश्च सुखादिव दान्तरः कश्चन पदार्थः ।' यथा — 'अस्य राज्ये कामना अजायत, तदाशया सुचिर मयं तपस्यतीति लोके व्यवहारः । अतः आशा कामनारूपैव । तयैव आशया मानवः' बहुधा क्लिश्यते । यथा रावणः परस्त्रीविषयया आशया बद्धः पुत्रबन्धुवियोगाऽऽदिकं महान्तं क्लेश मन्वभवत् । स्वकीय-राज्यभोगाऽऽदिकं सर्वमपि विनाश्य, अन्ततः मृति-मप्यापातयैव राज्यकामनारूपया आशया ग्रस्तस्सन् दुर्योधनः सुचिरं पीड्यमानः अन्ततः बन्धुवर्गस्य आत्मनश्च नाशमप्याप । कार्तवीर्यार्जुनः विप्रधेनुविषयया आशयैव महान्तं क्लेश मनुबभूव च । यद्यपि राज्यादौ प्रथम-मिच्छामात्रमेव जायते । अनन्तरं सैवेच्छा आशानामकं परिणामं लब्ध्वा पुरुष माकृष्य बहुधा पीडयन्ती क्रमेण च प्रवृद्धा दुस्साध्या दुष्प्रतिक्रिया च भवति । अत एव 'आशया बध्यते जन्तुः', 'अत्याशा परमं दुःखम् ।' 'आशैव ह्यापदां बीज,' मित्यादिवचनशतस्य प्रामाण्य मधि-गच्छति ।

क्वचिदियमेवाऽऽशा महाभोगभाग्याऽऽदिकं लम्भ-यन्ती अत्युत्तमपदवीमपि प्रापयति । यथा 'विश्वामित्रः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वसिष्ठधेनुविषयया ब्रह्मतेजोविषयया च आशया ग्रस्तः ब्रह्मर्षित्वं सप्तर्षिगणप्राधान्यं सृष्टेः प्रतिस्रष्टृत्व मपि लेभे। परशुरामः क्षत्रियतेजोविशेषेण महतीमाशा-मालम्ब्य क्षत्रियान्तकरणबिरुदमपि प्राप। हरिश्चन्द्रः सत्यव्रतनिष्ठाकामनया राज्यत्याग - वनवासाऽऽदिदुःख पीडितोऽपि अन्ततः महतां प्रतिष्ठां अध्यगमत्।

आशायाः क्वचि द्भोगभाग्याऽऽदिकारणत्वे 'आशैव ह्यापदां बीजम्' इत्यादिवचनव्याकोपो भवेत्। इति चे दुच्यते, इय माशा द्विविधा। सदाशा, दुराशा चेति। वेदशास्त्रसम्मतेषु सुखोत्तरेषु विषयेषु अभिनिवेशरूपा आशा सदाशा इत्युच्यते। वेदशास्त्रनिषिद्धेषु दुःखोत्तरेषु अभिनिवेशरूपा कामना दुराशा, इत्युच्यते। ईदृश-दुराशाविषयकमेव 'अत्याशा परमं दुःखं' 'आशया बध्यते जन्तुः' इत्यादिपूर्वोदाहृतवचनजातम्, सदाशाविषयाणि 'धर्ममाशासीत' तपः कामयेत, इत्यादिवचनजालानि। एवञ्च सदाशाया स्सुखसाधकत्वं, दुराशायाः दुःखहेतुत्वं, इति च व्यवहारः उपपद्यते। अत एव सदाशा सर्वैरपि जनैः काम्यैव। इयमेव हि मुक्तिहेतुरपि स्यात्।

एवञ्च क्लेशप्रधानाया अपि सदाशायाः सुखहेतुत्वं मुक्तिहेतुत्वञ्च। दुराशायाः केवलदुःखमात्रहेतुत्वमेव। इति सिद्धम्....

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आत्मसंयमः

श्री सन्निधानं लक्ष्मीनारायणमूर्तिः, अवधानी,
मीमांसाविद्याप्रवीणः

अथ बह्वर्थप्रसिद्धोऽय मात्मन् शब्दः अत्र मनो रूपान्तःकरणपरतया गौण्या वृत्या प्रयुज्यते। विभुत्वाऽऽदिगुणाना मात्मन्यन्तःकरणे चोपलम्भात्। तस्य संयमः - सर्वाऽऽत्मना उपरमः, चाञ्चल्या न्निवार्य अभिमतार्थमात्रे अवस्थापनं वा। स च अभ्युदयनिश्श्रेयसार्थिभि रवस्यकर्तव्य इत्युपदिशन्ति श्रुतिस्मृतीतिहासाऽऽदयः। तदस्य विषयस्य विशदावबोधाय यथामति प्रयतामहे।

अस्तुनाम अपवर्गकथा दूरे, अल स्वर्गचिन्तया, ऐहिकमपि सुखं असंयताऽऽत्मना माशामात्रमेव। न हि नित्यविक्षिप्तचित्ताः प्रतिनिमेषं विषयाद्विषयान्तर मनुधावमाना जनाः कीर्तिप्रतिष्ठासाधनं किमपि धनं विज्ञान माधिपत्य मन्यद्वा साधयितुं प्रभवन्ति। असाधयन्तो वा सुख मनुभवन्तीति नैतत्परोक्षं प्रेक्षावताम्। ये नाम तत्तच्छास्त्रेषु पारङ्गताः, ये वा महाधनधुरन्धराः, ये च राजनीतिचतुराः येऽपि विविधासु कलासु कुशलाः, देशे विदेशेषु च सुमहतीं प्रतिष्ठा माप्नुवन्; आप्नुवन्ति च सर्वेऽपि ते स्वस्वविषयेषु असाधारण मात्मसंयम मास्थायैव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तत्तत्पद मधितस्थु रित्यत्र न विप्रतिपद्यन्ते विवेकिनः। इयञ्च सर्वजनसाधारणी स्थितिः। विशिष्य च भारतीयाः आस्तिकाः परमार्थप्रधानाः ऐहिकं भोग मकिञ्चित्करं भावयन्तो धर्मपथ मनुवर्तन्त इति तेषा मय मात्मसंयमः सर्वतः प्रथमं समादरणीयताकोटिमाटीकते।

तदिह त्रिगुणाऽऽत्मिकायाः प्रकृते रुत्पन्नानां पञ्चभूतानां सत्त्वांशसमष्टिकार्यभूत मिद मन्तःकरणं वस्तुतो जडमपि चिदात्मच्छायोपेतत्वात् चेतनमिवाभासत इति दार्शनिका वदन्ति। इदमेव चास्माकं सुखदुःखाऽऽदिसाक्षात्कारे करणम्। अपि च — यत् वयं चक्षुषा रूपं पश्यामः, कार्णेन शब्दमाकर्णयामः, घ्राणेन गन्धमुपजिघ्रामः, रसनया रसमास्वादयामः, त्वचा स्पर्शं परिचनुमः तदेतत्सर्वमपि मनःप्रवृत्त्यधीनमेव। इन्द्रियाणि तु चक्षुरादीनि केवलं द्वारभूतानि। तथाचोक्त मभियुक्तैः —

"यथा तटाकोदकं छिद्रान्निर्गत्य कुल्याऽऽत्मना केदारान्प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति, तथा तैजस मन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटाऽऽदिविषयदेशं गत्वा घटाऽऽदिविषयाऽऽकारेण परिणमते, स एव परिणामो वृत्तिरित्युच्यते॥" इति। (वेदान्तपरिभाषा)

किं बहुना? विना मनस्संयोगं किमपीन्द्रियं किञ्चिदपि ज्ञानं जनयितु मीष्टे। अत एव अन्याऽऽयत्ते मनसि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विस्फारिताक्षा अपि वयं अत्यन्तसन्निकृष्टमपि रूपं न पश्यामः, अतिमहान्तमपि शब्दं न शृणुमः। न केवलं ज्ञानेन्द्रियाणामियं दशा, कर्मेन्द्रियाण्यपि पाणिपादादीनि मनसैव प्रयुज्यमानानि तत्तत्कार्येषु व्याप्रियन्त इत्यत एव 'मनो दशेंद्रियाध्यक्ष' मिति प्रस्तूयते।

एवञ्च परिदृश्यमानं चराचराऽऽत्मक मखिलमपि विश्वं कामाऽऽत्मना परिणतस्य मनस स्समुन्मेषविशेषं समुद्घोषयन्त्यौपनिषदा इति अणोरणीयसोऽप्यस्य महिमा महतो महीयन् भवति।

इत्थंभूतस्य मनसस्संयमः कर्तव्यः। तत्र तावत्— 'यथा रज्ज्वज्ञानाद्भ्रातस्सर्पो रज्जोर्नातिरिच्यते, तद्वदात्म-विवर्तमिदं विश्वमात्मनो नातिरिच्यते। तथा च वस्तुतो न मनो, नापि मननीया विषयाः, किन्त्वात्मैवेदं सर्वमिति निश्चयेन, नित्यनिर्विकल्पसच्चिदानन्दाऽऽत्मरूपेणावस्थानं प्रथमः कल्पः। तदानीमेव 'सर्वाऽऽत्मना उपरम' रूप-स्संयमशब्दार्थोऽपि सुतरां सङ्गच्छते। किन्तु सोऽयं मन्दमध्यमाधिकारिणां दुरधिगम इति, तत्कृते कल्पान्तर-प्रदर्शनमवश्यमापतति।

यद्यपि अतिचञ्चलत्वादत्यन्तबलवत्त्वाच्च सुग्रहो मनःप्रग्रहः। अत एवोक्त मर्जुनेन —

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ।। इति।
(भगवद्गीतायाम् 6-34)

अपि च सत्स्वपि नानाविधेषु मनःपरिणामेषु काम-क्रोधाभिधानौ द्वावेव सर्वतः प्रबलौ, सर्वानर्थमूलौ, दुर्जयौ चेति तज्जयायास्माभि रवहितै र्भाव्यम् । तत्रापि दुष्पूरत्वात्, दुष्क्रियाप्रयोजकत्वात्, विवेकविनाशकत्वाच्च काम एव प्रधानः ! स केनचित्प्रतिहतः क्रोधत्वेन परिणमत इति क्रोधस्यापि मूलं काम एव । अतस्तस्य प्रयत्ननिग्राह्यत्व मुक्तम् ।

"जहि शत्रुं महाबाहो कामरूपं दुरासदम्" इति ।
(भ. गी. 3.43)

इह च 'वर्वविषयोपभोगेन कामप्रविलय' इति पक्षो न क्षमते । अपरिमेयाणां विषयाणां युगशतेनापि भोगासम्भवात् कामस्यापि विषयोपभोगादुत्तरोत्तर मुपचीयमानत्वेन विलयासम्भवात् । तदेतत् सदृष्टान्तं स्पष्टीकृतं —

"न जातु कामः कामनामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ।।" इति।
(मनुः 2-94)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तर्हि कथमस्य जयः? तत्र निरपायमुपायमावेदयतिस्म भगवान् वासुदेवः —

"अभ्यासेन च कौन्तेय! वैराग्येण च गृह्यते ॥" इति
(भ. गी. 6-35)

पतञ्जलि रप्याह —

"अभ्यासवैराग्याभ्यां तन्निरोधः ॥" इति ।
(योगदर्शने 1-12)

बहुव्ययप्रयाससाध्यत्व - सातिशयत्व - क्षयिष्णुत्व - दुःखोदर्कत्वबन्धकत्वाऽऽदिदोषदर्शनेन दृष्टादृष्टभोगसाधनेषु वैतृष्ण्यापरपर्यायं वैराग्यमास्थाय यतो यतो निश्चरति चञ्चलं मनस्ततस्ततो नियम्य आत्माभिमुखीकरणरूपः, तदशक्तौ सगुणमूर्तिध्यानरूपो वा अभ्यासः कर्तव्यः । अत्र च अहिंसासत्यास्तेयब्रह्मचर्याऽपरिग्रह रूपा यमाः, शौचसन्तोषतपस्स्वाध्यायेश्वरप्रणिधानरूपा नियमाश्च नितान्त मुपकुर्वन्ति । तेषां च स्वरूपोपयोगाऽऽदीनि, साधनान्तराणि योगदर्शनादिषु प्रसिद्धानि, विस्तरभिया नात्र विव्रियन्ते ।

नन्विद मनुभवविरुद्धमुच्यते, यद्विषया बन्धकस्वभावाः अत स्तेभ्यो निवर्तितव्यं मन इति च । नहि स्रक्चन्द्रनवनितादीन् विषया नुपभुञ्जाना जनाः केन

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चिद्द्ध्यन्ते, नापि दुःखमनुभवन्ति, अपि तु विषयसमं सुखमेव समश्नुवते इति चेत्, तदेवहि विषयाणां विषयत्वं, यद्वशिष्य बन्धकत्वं उक्तं च —

"विशब्दश्च विशेषार्थः सिनोति बन्धनार्थकः ।
विशेषेण सिनोतीति विषयोऽर्थनियामकः ॥ इति ।
(सर्व....ल. सं.)

नाविदितमिदमस्माकं, यन्महान्तोऽपि कतिचन अनर्थकत्वेनावधारितेभ्योऽपि विषयेभ्यः केभ्यश्चन आत्मानं निवर्तयितु मपारयन्तः खिद्यन्तीति । तत्रापि निषिद्धविषयसेवया न केवलमस्मिन्, अपि त्वमुष्मिन्नपि लोके विशेषतोऽनर्थप्राप्तिरपरिहार्यैव । विषयानुचिन्तनस्याऽत्मविनाशपर्यवसायित्व मभिहितम् —

"ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामा त्क्रोधोऽभिजायते ॥
क्रोधा द्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशः बुद्धिनाशा त्प्रणश्यति ॥" इति।
(भ. गी. 2-62, 63)

अथच महदिद मज्ञानविजृम्भितमस्माकं, यद्विषयनिषेवणस्याऽऽनन्दकारणत्वविभावनम् । वस्तुतस्तु — आनन्द आत्मस्वरूप एव । तत्तद्विषयाणा मार्जने, रक्षणे,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अपक्षये, विनाशे च अतितरां दुःखमेवानुभवामो, न सुखम् । सति चैवं मध्ये यद्विद्युद्विलासचञ्चलः कोऽप्यानन्दलेशोऽनुभूयत एव, सोऽपि न बहिर्विषयगतः, किन्तु — बाह्यविषयसेवया नितान्तं परिश्रान्ते, विश्रान्तिलिप्सया चान्तर्मुखे अन्तःकरणे आनन्दरूप आत्मा प्रतिफलतीति स एवास्माभिरनुभूयते । तदुक्तम् —

"का चिदन्तर्मुखावृत्तिरानन्दप्रतिबिम्बभाक् ॥ इति ।
(पञ्चदश्यां – पञ्चकोशविवेके, ९)

तमिमं समयविशेषमजानद्भिरस्माभिरानन्दो विषयगतत्वेन विभाव्यते । अत एव श्रुतिरपि विषयाऽऽनन्दानां ब्रह्माऽऽनन्दमहार्णवशीकरायमाणत्व मुपदिशति —

"एतस्यैवानन्दस्य अन्यानि भूतानि मात्रामुपजीवन्ति"
इति । (बृहदारण्यके 4-3-32)

अतश्च सुष्ठूक्तं यद्विषया बन्धकस्वभावाः, अतस्तेभ्यो निवर्तितव्यमिति च ।

प्रकृते च — चक्षुरादीन्द्रियद्वारकबाह्यप्रवृत्तिनिरोधात् बहिर्विषयानुपलम्भेन भाव्यनर्थप्रतिबन्धेऽपि न तावता सर्वाऽऽत्मना मनसस्स्वास्थ्यसम्भवः; इह जन्मनि जन्मान्तरेषु च प्रागनुभूतानां संस्काररूपेण स्वस्मिन् विद्य-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मानानां स्मृतिशक्त्या समुत्थाप्यमानानां अनन्तानां विक्षेपहेतूनां विषयाणामनपायात्। अतस्तादृशसंस्कारदुर्बीजभर्जनाय सर्वेन्द्रियव्यापाराणां शास्त्रीयतासंस्कृतानां परमेश्वरचरणसमर्पणरूपप्रणिधानपूर्वकं ध्यानं प्रधानतया उपादेयं भवति। उक्तञ्च —

"ध्यानहेयास्तद्वृत्तयः" इति। (यो.द. 2-11)

आहारविहारनियमोऽप्यात्मसंयमकामाना मत्यावश्यकः। 'स्थूलशरीराभिवृद्धिहेतोरन्नपानादेरन्तःकरणेन मनसा कस्सम्बन्धः' इति शङ्का न युक्ता। यतः —

"अन्नमशितं त्रेधा विधीयते,
तस्य यः स्थविष्ठो भागस्तत्पुरीषं भवति।
यो मध्यम स्तन्मांसं,
योऽणिष्ठ स्तन्मनः॥" (छान्दोग्ये 6 5-1)

इति श्रुत्या भक्षितान्नसारस्य मनः परिणामवर्णनात्। प्रसिद्धश्च सात्त्विक - राजस, तामसभेदो भोज्यद्रव्येषु। तत्र राजस - तामसद्रव्यसेवया अन्तःकरणेऽपि तद्गुणवृद्धौ, समुद्धतस्य तस्य निग्रहः कृच्छ्रतरस्स्यादिति, युक्ताऽऽहारविहारत्वं, युक्तस्वप्नावबोधत्व मित्यादिकमनुपेक्षणीयमेव।

अत्रेदं रहस्यमनुसन्धेयम्। विदितमेव नः, यदस्मदीयं मनः सुषुप्तिदशामेकां परिहाप्य जाग्रति स्वप्ने वा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निरन्तरं यं कमपि विषयं समाकलयदेव व्यवहरतीति। तस्य च सहसा निर्विषयताऽऽपादनं न केवलं दुश्शकं, अपि त्वशक्यम्। अतस्तस्य निषिद्धविषयव्यावृत्तिपूर्वकं विहित-विषयेषु प्रवृत्तिकल्पनद्वारा क्रमात्संस्करणमावश्यकम्। यद्यपि प्रकृतिवशादेव क्वचिद्रागः क्वचिद्द्वेषश्च भवतः, ततश्च प्रवृत्ति - निवृत्ती। तत्र प्रकृतिं नियन्तुं न शक्नुयादपि कश्चित्। रागद्वेषौ पुनर्नियन्तुं शक्नोत्येव पुरुषः शास्त्रदृष्टिस्सन्। यदि न नियच्छति, तदा अनर्थ मृच्छति। रागद्वेषौ हि पुरुषस्य परिपन्थिनौ, श्रेयोमार्गस्य विघ्नकारित्वात्, तस्कराविव पथि। माऽस्तु तस्कराऽऽगमनमस्मदायत्तं, न पुनस्तन्निग्रहोऽपि। अन्यथा – 'तयो र्नवशमागच्छेत्, इति कथमुपदिशेद्भगवान्!

तदेवं यः पुरुषः ध्याननिष्ठः, नियन्त्रितरागद्वेषः, अप्रतिषिद्धानवर्जनीयांश्च विषयान् यथायोगमाहरन् कृताऽऽत्मसंयमो भवति, तस्य प्रसन्नचित्तता, सर्वदुःखहानिः, आनन्दात्मस्वरूपेणावस्थानं, कृतकृत्यता चेति फलपरम्परा भगवता गीता —

"रागद्वेषवियुक्तैस्तु विषया निन्द्रियैश्चरन्।
आत्मवश्यै र्विधेयात्मा प्रसाद मधिगच्छति॥

12

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ।।" इति ।
(भ. गी. 2-64, 65)

अलं विस्तरेण; सारांशस्त्वयम् — यथा वर्षासु नानाप्रवाहनिवहसमुपबृंहितविग्रहा, प्रभूतवातविस्तारितवेगा, महानदी निरर्गलं प्रवहन्ती निकटस्थानि क्षेत्राऽऽरामग्रामनगाऽऽदीनि नितान्तमाकुलयति, सैव पुनस्समुचितसेतुबन्धाऽऽदिना सुनियन्त्रिता, सुकृतकुल्योपकुल्याक्रमेण च प्रसारिता न केवलं नानर्थमुत्पादयति, अपितु बहुविधमहार्थसाधनतामप्यधिगच्छति, तद्वदिद मन्तःकरणमपि अनियन्त्रितमनर्थपरम्परावहं, नियन्त्रितञ्च निखिलपुमर्थसाधनसमर्थं भवतीति । अत एवोक्तम् —

"मन एव मनुष्याणां कारणं बन्ध-मोक्षयोः ।
बन्धाय विषयाऽऽसक्तं मुक्त्यै निर्विषयं स्मृतम् ।।"
इति । (पञ्चदश्यां - योगानन्दे, ११७)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्त्रीस्वातन्त्र्यम्

उभयभाषा, साहित्यविद्याप्रवीण,
पञ्चांगं वेङ्कटनरसिंहाचार्यः

स्त्रीणां स्वातन्त्र्यमावश्यकं न वेति विषये बहुधा विप्रतिपत्तिरभिदृश्यते। तासां स्वातन्त्र्यं नास्ति, तदावश्यकमिति, बहवः कथयन्ति। तत्र प्रथमं स्वातन्त्र्यपदस्यार्थो वर्णनीयः। परावेक्षां विनैव यः स्वशक्त्या कार्यसिद्धिमाप्नोति सः स्वतन्त्र इत्युच्यते। तद्भिन्नः परतन्त्रः पराधीनश्च। स्त्रियः प्रायशः जन्मनैव अबलाः। अतः ताः स्वकार्यनिर्वहणसमर्थाः न भवन्ति। पुरुषाः एव तासां प्रयोजनमपि साधयन्ति। तस्मात्पुरुषाः स्वतन्त्राः इति, स्त्रियः अस्वतन्त्रा इति च, विज्ञायते। अत एव तासां स्वातन्त्र्यं नास्तीति सिद्धं भवति। अत्र विषये "पिता रक्षति कौमारे, भर्ता रक्षति यौवने, पुत्रो रक्षति वार्धक्ये न स्त्री स्वातन्त्र्य मर्हति।" इति प्राचीनानां सूक्तिरेका प्रसिद्धा वर्तते। बाल्ये आविवाहात् पिता, यौवने भर्ता, वार्धके पुत्राश्च स्त्रियः रक्षन्ति पोषयन्ति च। अतः स्त्रीणामात्मरक्षणपोषणाऽऽदिक्लेशः नाऽऽवश्यकः इति तस्याः अर्थः वर्णनीयः। धातूनामनेकार्थतया अर्हतीति पदस्य प्राप्नोतीत्यर्थो वक्तुं शक्यते। अस्याः सूक्तेः विपरीत-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मर्थं मभिवर्ण्य "पूर्वपुरुषैः स्त्रियः स्वभोगवस्तूनि परिकल्प्य स्वेच्छास्वातन्त्र्यादिभ्यः दूरीकृत्य दास्यश्रृङ्खलाभिः बद्ध्वा, आसायं महानसे आसूर्योदयं च शयनगृहे च बन्दीकृताः। अपिच विद्याऽभ्यासे अधिकारनिर्वहणेच न तासामल्पोप्यवकाशः कल्पितः। पुरुषहस्तेषु ताः क्रीडाकन्दुकीकृताः इतीदानींतनाः केचन पूर्वान् निन्दन्ति। तदिदं सर्वमप्यज्ञानविलसनमेवेति वक्तव्यम्। पुरा तावत् विना वेदान् समस्तमपि संस्कृतवाङमयं स्त्रियः अपि समभ्यस्यन्तिस्म। परन्तु धनसम्पादनोपयोगिविद्यास्तु ताभिः न पठिताः। तदानीं धनसम्पादनक्लेशः स्त्रीणां आवश्यकः नाऽऽसीत्। पुरुषाः एव सर्वं सम्पादयन्ति स्म। अन्यच्च, तदानींतनाः यथालाभसन्तुष्टाः भूत्वा, आडम्बरविरहिताः ऐहिकसुखान्यतीवानपेक्षमाणाः आध्यात्मिकचिन्तनपराः जीवयात्रां नयन्ति स्म। अत एव स्त्रीणामपि धनसम्पादनयत्नः आवश्यकः नासीत्। शरीरस्य चर्मावरणमिव स्त्रीणां रक्षणं पुरुषाणामत्यावश्कम्। चर्मानावृत मामिषं पक्षिण इव पुरुषरक्षणरहितां स्त्रिमपहर्तुं धूर्ता यतन्ते। अत एव पूर्वस्मिन् काले अबलाजनपरिरक्षणविषयेऽत्यन्तं जागरूकता स्वीक्रियते स्म। स्त्रियोऽपि परपराभवमाशङ्कमानाः एकाकिन्यः गृहात् बहिर्गन्तुमपि बिभ्यति स्म। नारीशीलपरिरक्षणं मुख्यकर्तव्यं पुरुषाणाम्। पुरुषाः अपि स्ववनितामर्धाङ्गीं प्राणसमां मन्यमानाः यज्ञाऽऽदिपवित्रकर्मनिर्वहणेऽपि तासा-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मवकाशं पर्यकल्पयन्। किं बहुना? अपत्नीकस्य न कुत्राप्यर्हणा वर्तते। पुरुषेच्छामनुसृत्य वर्तनमेव प्राचीनवनितानां समुचितं श्रेयस्करमिति चाऽनुमोदितम्। अत एव ताः स्वातन्त्र्यसम्पादनाय नैवायतन्त। दाम्पत्यसम्बन्धं पवित्रं मत्वा पूर्वपुरुषाः स्वजायां अत्यन्तगौरवेण समभावयन्। धनार्जनयत्नं विना, स्त्रीणां सर्वत्रापि पुरुषैः समाना प्रतिपत्ति रस्तीति ज्ञायते। परन्तु स्त्रीपुरुषाणां सहविद्याऽभ्यासः सहखेलनं, यथेच्छावर्तनमित्याऽऽद्याधुनिकसम्प्रदायाः तदानीं नैवाङ्गीकृताः। सदभ्युपपत्तौ बहवोऽनर्थास्सम्भवन्तीत्यस्माकमिदानीमप्यनुभवसिद्धमेव। पुरा स्त्रीणां पुरुषच्छन्दानुवर्तनरूपं स्वातन्त्र्य मङ्गीकृतम्। न तु स्वेच्छावर्तनरूपम्। तथाऽङ्गीकारे महान् प्रमाद इति तेषामाशयः। नेयं प्राचीना पद्धतिः समीचीना, नवेति विमर्शनं नेदानीमावश्यकम्। तदानीं तादृशपरिस्थितिः सर्वैः समादृता।

कालान्तरेण राजधर्माः समाजधर्माश्च परिणताः। देशकालपात्रस्वभावानुसारेण बहुळप्रजानुमतिं परिगृह्य लोककल्याणकामुकाः महात्मानः समाजधर्मेषु संस्कारमनुमोदन्ते। अत एव कालत्रमानुसारं बहूनि धर्मशास्त्राणि विरचितानि। इदानीं भारतदेशस्थितिः अनुदिनं नूतनचैतन्यं भजते। खण्डान्तरीयसम्पर्कवशादाहारविहार-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

व्यमहारेषु नूत्नभावाः सर्वेषां हृदयेषु समुत्पद्यन्ते। परानुकरणं भोगलालसता चानुदिनमभिवर्धते। तत्कृते येन केन वाऽप्युपायेन धनार्जनं मुख्यकर्तव्यमस्ति। केवलं पुरुषै सम्पाद्यमानेनैव धनेन जीवयात्रानिर्वहणं दुस्साधं भवति। अतः स्त्रियोऽपि धनसम्पादकविद्यामभ्यस्य, अधिकारपदमारुह्य, धनसमार्जनं कुर्वन्ति। तदवश्यकर्तव्यमापतितं तासाम्। खण्डान्तरीयसम्पर्कजनितनव्यभावक्षाळितप्राचीनसम्प्रदायगौरवाः पुरुषाः योषितश्च दाम्पत्यसम्बन्धं विलासप्रायं मन्यन्ते इदानीम्। दम्पत्योः परस्परपरित्यागः सुकरः वर्तते। अतो विशेषतः नारीणां स्वरक्षणपोषणादिकार्येषु सामर्थ्यसम्पादनं अवश्यकर्तव्यं भवति। स्त्रीभिः पराधीनत्वाभावरूपमेव स्वातन्त्र्यं समभिलषणीयम्। न तु स्वेच्छाविहाररूपम्। तत्र बहवो दोषा वर्तन्ते इति विदितमेव। अतः भारतनारीमणयः स्वशीलं सम्यक् परिरक्षन्त्यः आदर्शमहिळा भूत्वा भारतदेशगौरवमभिवर्धयन्त्यः समुचितस्वातन्त्र्यसम्पादनाय यतेरन्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

धूमशकटसौकर्याणि

प्रवीणप्रचारक्, श्रीमान् राघवाचार्यः

अस्मद्देशे चिरात् मानवः यातायातार्थं अनेकानि वाहनानि उपयुंक्ते स्म। प्रथमतः सः बलीवर्दान्, गर्दभान्, करिणः, अश्वान् वा आरुह्य यातायाते कुर्वन् आसीत्। तदनन्तरं तानेव शकटेषु नियोज्य सपरिवारं गन्तुं प्रावर्तत। भारतदेशे इत्थंभूते यातायातसाधने पश्चिमदेशीयेषु 'जार्ज स्टीफेन्सन्' इति कश्चित् वैज्ञानिकः बाष्पशक्तिं अन्विष्य अजानात्।

भारतदेशे आंग्लेय - स्वाऽऽयत्तशासने दृढीभूते निज-वस्तुस्तोमं निनीषवः सन्तः ते अत्र धूमशकटं समचालयन्। तेनैव शकटेन आत्मीयानां सोल्लासं सत्वरं च यातायाते वाञ्छन्तः ते एतदर्थाः अपवरकरूपाः पेटिकाः उदपादयन्। अनन्तरं च एतच्छकटसंचालनकार्यनिर्वाहव्ययं सिंसाध-यिषवः एव ते अस्मद्देशीयानामपि तद्द्वारा यात्रां कर्तुं स्थानं तृतीयश्रेणीरूपं असाधयन्। अत एव तदात्वे अस्मदीयानां यात्रापेटिका (अपवरकः) तदितरयानापेक्षया सर्वथा सौकर्यहीना उपवेशमात्रार्हा च तैः संकलिता। इत्थं भारतदेशे धूमशकटयानं समजायत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्य यानस्य प्रवेशनेन अस्मद्देशीयानां अत्यधिकं सौकर्यं उदभूत्। इतरयानापेक्षया अस्मिन् सौविध्यानि अधिकानि सन्ति। अस्मिन् याने वयं समस्तपरिवार-सहिताः गृह इव सुखं उपविशन्तः सन्तः यात्रां कर्तुं प्रभवामः। अन्यच्च, पेटिकान्तरेव इतस्ततः संचारोऽपि कर्तुं शक्यते। अपिच, अस्य अतिसत्वरधावनेन एतदति-रिक्तयानापेक्षया द्रुततरं निर्दिष्टस्थानं प्राप्नुयाम। अपरं च, अनेके परिवाराः एकदैव यात्रां कर्तुं प्रभवन्ति। किं बहुना, सानन्दं सुप्ताः सन्तः एव गन्तुं शक्नुमः।

इदं प्रथमतः एवं आंग्लेयाः भारतदेशे समचालयन्। अत एव अस्मिन् यावन्ति उच्चश्रेणीषु तदीयेभ्यः सौकर्याणि संपादितानि तावन्ति निम्नश्रेण्यां संपादयितुं तैः मनसाऽपि न विचारितम्। कथा च, प्रथम - द्वितीयश्रेण्योः तदीयार्थे विविधानि सौविध्यानि असाधिषत। तृतीयश्रेण्यां तु यातुं अस्मदीयार्थं वस्तुवाहकपेटिकावत् निरवधिकतया यात्रिणः समवाह्यन्त। तत्र च उपवेशनस्य का वार्ता, तिष्ठतोऽपि यात्रा कष्टसाध्या अवर्तत। एवंच, अस्मदीयान् जडवस्तु-जातमिव संवाह्य अपरिमितधनार्जनमेव तेषां अभिमतं आसीत्। अस्मादेव कारणात् प्रथम - द्वितीयश्रेण्योः आंग्लेया एव प्रवेशं अर्हन्ति स्म। तत्र कयाऽपि विधया भारतीयानां प्रवेशः नानुमन्येत इति अस्माकं अवमानकरो

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नियमोऽपि तैः निरधारि। अथ गच्छता कालेन यदा स्वातन्त्र्यसंग्रामः सबलः अभूत् तदाप्रभृति एषः नियमः अतिकष्टसाध्य इति कृत्वा दूरीकृतः। परन्तु तृतीयश्रेण्यां न काऽपि उन्नतिः समपादि, न वा तद्विषयकविचारो वा अकारि। यद्यप्येषः प्रसङ्गान्तिक्रान्तः विषयः तथाऽपि प्रसक्तानुप्रसक्त्या वर्णितः।

अद्यत्वे भारतदेशे स्वतन्त्रे संवृत्ते पदेपदे तृतीयश्रेण्यां अपि सौविध्यं उत्पादयन्ती वर्तते अस्मच्छासनसत्ता। अद्यत्वे तु तृतीयश्रेण्यां अपि कासुचित् सुदूरगासु पेटिकासु सुख-स्वापशय्या इत्याद्याः सन्नाहाः वर्तते। इतोऽप्यधिकं सौकर्यं भारतीयेभ्यः, विशिष्य अल्पधनेभ्यः विधातुं प्रयत्न-शीलाः सन्ति शासनकार्यनिर्वाहकाः। अद्यखलु अस्मिन् विविधानि सौकर्याणि उत्पादितानि विद्यन्ते। दूरदेशं जिगमिषवः कतिपयदिनेभ्यः पूर्वमेव यात्राचीटिकां क्रीत्वा निजस्थानपरिरक्षणं कर्तुं प्रभवन्ति। अतिदूरयात्रिणामेव केवलमितिकृत्वा काश्चित् पेटिकाः निर्दिष्टाः वर्तन्ते। तासु तदितरपेटिकाऽपेक्षया अल्पसंख्याकाः यात्रिणः अनुमन्यन्ते, तेषां रात्रौ सुखस्वापसौकर्यं कल्पितं विद्यते। इत्थंभूतासु पेटिकामण्डलीषु एका भोजनशालापेटिका वर्तते, यत्र यात्रिभ्यः रुच्यनुगुणं स्वादिष्ठं भक्ष्यभोज्यादिकं यथाकालं विक्रीयते। मध्येमार्गं निर्दिष्टस्थानेषु पेटिकाशोधकाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आगत्य पेटिकासंमार्जनं, शोधनं पेटिकाजलभांडे जलापूरणं च कुर्वन्ति । एवमेव कतिपयेषु स्थानेषु यत्रिकृते स्नानागारः अस्ति यत्र यात्रिभिः शीतं उष्णं वा जलं लभ्येत । शकटविश्रामस्थलेषु अवतीर्णः यात्री यदि तत्पुरं ग्रामं वा गन्तुं इच्छति तर्हि सः तत्रत्यविश्रामस्थलाधिकारिणः सकाशे निजवस्त्वादिकं निक्षिप्य गन्तुं प्रभवति । एतदर्थं शुल्कं किञ्चित् वर्तते । तद्दानेन तद्वस्तु परिरक्ष्य अधिकारिणा परावर्त्यते ।

एवंविधानि विविधानि सौविध्यानि धूमशकटेषु विद्यन्ते । एवंच अद्यतनेषु दिनेषु धूमशकटः अस्माकं अतितरां सुखाऽधायकं यानसाधनं संवृत्तम् । विशेषतः वायुयानाऽऽगमनात् प्रभृति धनिकाः तं वाञ्छन्ति । अतः साधारणजनानां मुख्यतः दरिद्राणां तु एतत् यानं ईश्वरीयवरप्रसादरूपं इति यदि कश्चित् ब्रूयात् तत्र न काऽप्यत्युक्तिः ।



CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गृहपरिश्रमः

हरि साम्बशिवशास्त्री, M. A.

मानवानामत्यन्तावश्यकवस्तुषु प्रथमगणनीय आहारः, ततः वस्त्रम् । आहारे च सम्पादयितव्ये कृषिः समादर्तव्या । तथा वस्त्रविषयेऽपि तन्तूकरण, तन्तुवानाऽदयो व्यापाराः अनुष्ठितव्याः । तदर्थंच, हल, तुरी, वेमदण्डादीनि बहूनि साधनानि निष्पादयितव्यानि । अपिच मानवानां दैनन्दिनजीविते पात्राऽऽदीन्यपि वस्तूनि विधधातुभिः निर्मितानि मुख्यानि । तानि सर्वाण्यपि गृहेष्वेव पूर्वस्मिन् काले निरमायिषत । एत एव गृहपरिश्रमा इति उच्यन्ते, यन्मूला जीवनोपाधिरासी त्सर्वेषां पुरा । एते च परिश्रमाः वृत्तयः इति प्रथिताः ।

अत्रेयं समालोचना, गृहं नाम किमिति । यद्यपि कुड्यद्वारकवाटाऽऽदिसङ्घातमयः कुटीर एव गृहम् । तथाऽपि एतादृश गृहहीनाः निराधाराः दैवोपहता बहवः गृहपारिश्रामिककुटुम्बाः दृश्यन्ते । अतस्तदुपपत्तये गृहशब्दार्थं एवं निरुक्तः 'गृहिणी गृहमुच्यत' इति । एवञ्च सर्वाऽऽधारभूता गृहिण्येव याथातथ्येन गृहमिति फलति । ततः गृहेण, द्वारैः, तत्पुत्राऽऽदिभिश्च सम्भूय व्यापारित एव परिश्रमो गृहपरिश्रमतां भजते; न तु केवलं व्यष्टिसमादृतः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पितृपुत्रपरम्परागतविज्ञानधनास्सर्वेऽप्यत्र परिश्रमेषु स्वस्वकर्मणि निष्णाताः। सेव्यसेवकभावसम्बन्धलेशस्यापि नात्र प्रसरोऽस्ति। गृहे परिश्रमे च सर्वेषां साधर्म्यं साजात्यं च निरूपयन्नयं गृहपरिश्रमः न केवलं व्यक्तेः किन्तु गृहस्य सर्वस्यापि वृत्तिर्भूत्वा तत्रत्यानां सर्वेषां जीविकामादधाति। निरुद्योगितां च निर्मूलयति। तक्ष - कुम्भकार - तन्तुवाय - लोहकार - कृषीवलाऽऽदीनां गृहा एतादृशा एव। एते च परस्परं स्वस्वनिष्पादितवस्तुविनिमयमार्गेण (Barter System) स्वाभिलषितवस्तूनि सम्पाद्य गृहं ग्रामं च सुभिक्षं स्वयं समृद्धञ्चाकार्षुः।

गच्छता कालेन यथा यथा जनता वर्धते स्म तथा तथोपादेयवस्तुसंख्याऽप्यवर्धत। अतः अल्पीयसा कालेन अधिकोत्पत्तिं सिसाधयिषवः स्वप्रज्ञाकौशलेन हस्तवाह्यान्येव अल्पाल्पानि यन्त्राणि रूपयामासुः। तत्साहाय्येन गृहेष्वेव यथाऽवसरं वस्तूनि निर्ममुः।

एवंस्थिते अष्टादशतमशताब्द्यां जलबाष्प (Steam) शक्तिः विज्ञानपरिशोधनफला प्रादुरासीत्। ततश्च हस्तावलम्बं विनैव यन्त्राणि चालयितुमारभ्यन्त। विना बहुळाऽऽयासमधिकवस्तूत्पत्तिश्च साधिता। क्रमेण विद्युच्छक्तिश्च विज्ञानवरप्रसादिता अवततार, यन्मूला एवेदानींतनास्सर्वेऽपि यन्त्रपरिश्रमाः। महारम्भाः देशीय-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सौभाग्यमूलाधाराश्चैते परिश्रमा इदानीं बभूवु:। अयोमार्गा: (Railways) अय:कर्मागारा: (Iron & Steal Factories) विमाननिर्माणशाला:, वस्त्रनिर्माणशाला: (Cott mills) इत्यादयो बहव एतादृशा:।

गृह-यन्त्रपरिश्रमयो: निर्वहणविधौ महान् भेद: परिदृश्यते। गृहे सर्वेऽपि पारिश्रामिका:; स्वस्वक्रिया-निर्वहणविधौ सर्वेऽपि प्रकृत्या कुशला:; परम्पराऽऽगतमेतेषां विज्ञानम्; निरुद्योगिताऽत्र निराश्रया।

यन्त्रपरिश्रमविषये त्वन्यथैव गतिराद्रियते। सेव्य-सेवकभावमूलोऽयमारम्भ:। परिश्रमनिर्वाहक: यजमान एक एव स्वतन्त्र:। अन्ये तु तदधीनवृत्तय एव कर्मकरा:। परिश्रमसम्बद्धा वायव्ययावेतेषां न बिषयौ। किन्तु भृतिविषयपरा: केवलम्। भृतिविषयका: विवादा: निरन्तराश्चात्र। तत: पदेपदे निरुद्योगिता शिर उन्नम्य द्वारि प्रत्यवतिष्ठते। किं चैवं जीविकानिर्वाहाय कथञ्चि-द्भिन्ने वृत्ती आस्थितयो: पितृपुत्रयो: वृत्तिभेदेन साधर्म्य-मपि नश्यति। गृहसमष्टिजीवनविधि: बलाद् दूरीक्रियते।

किञ्च यन्त्रप्राबल्यसमुपचिता: परिगतशक्तय: परिश्रमा: स्वाऽऽत्मना वाणिज्य - पारिश्रामिकरङ्गस्थली: सर्वा आक्रम्य तिष्ठन्त: सर्वत्र स्वमहिमानमुदीरयन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

देशस्य जीवभूतामार्थिकव्यवस्थां (Economic Condition) नियच्छन्ति च । तत्तेजोऽभिभूताः गृहपरिश्रमाः दिवान्धा इव कोणेषु विश्राम्यन्ति । ततश्च तदुपाऽऽश्रितास्सर्वे कुटुम्बपोषणे असमर्था भवन्ति । परम्पराऽऽगतमेतेषां विज्ञानं निर्मूलयते, वृत्त्यन्तराणि च उत्प्रेक्ष्यन्ते । सेयं निरुद्योगिता जनयित्री अनर्थपरम्परा ।

यद्यपि रसायनिकाः अयोदारुप्रभृतयः पदार्थाः गृह-परिश्रमेषु निष्पादयितुं न शक्यते, ततः यान्त्रिका अपि परिश्रमाः सर्वधा वर्धनीयाः । तथाऽपि वस्त्राऽऽदीनि बहूनि वस्तूनि गृहपरिश्रमेष्वप्युत्पादयितुं शक्यन्ते । यद्ये-तानि गृहेषु ग्रामेषु च निष्पन्नानि स्युः तदा गृहाः ग्रामाः स्वयंसमृद्धाः सुभिक्षाश्च भूत्वा निर्व्यापारतां निर्मूलयेयुः । अतः देशकालानुरोधेन गृहपरिश्रमानपि नूतनयन्त्रपरिकरैः समुज्जीव्य गृहयन्त्रपरिश्रमा वुभावपि इतरेतराश्रयिणा-वविरोधौ च कृत्वा सर्वथा पालनीयौ ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वाणिज्ये वसति लक्ष्मीः

— हरि लक्ष्मीनरसिंहशर्मा

द्रव्याणां क्रयविक्रयाऽऽत्मकं परस्परविनिमयरूपं च व्यापारमनुतिष्ठन्तः वणिजः ग्रामे ग्रामे वर्तन्ते। वणिजां कर्म वाणिज्यम्। तदाश्रित्य लक्ष्मीस्समुल्लसतीति वाक्यार्थः।

पुरातने खलु काले यात्रासाधनानि विरळ-विरळान्यासन्। ग्रामाद्ग्रामं देशाद्देशं च गन्तुं बहूनि कष्टान्यनुभूयन्ते स्म। अतः यावदपेक्षितं तावत्सर्वमपि वस्तुजातं ग्रामेष्वेव प्रायशः निरमायि। भिन्नभिन्नवस्तूत्पत्तिपराः भिन्नभिन्ना वृत्तयश्च ग्रामेषु सुप्रतिष्ठिताः। इतरेतराश्रयमूला एता वृत्तयः आर्थिकसामाजिक व्यवस्था नियच्छन्ति स्म। एवं कृषिः सर्वेषां साधारणो धर्म आसीदिति ज्ञायते।

तथाऽपि न सर्वाणि वस्तूनि सर्वत्र लभ्यन्ते, उत्पादयितुं वा न शक्यन्ते। तत्तद्वस्तूत्पादनविधावावश्यकानां रसायनिकद्रव्याऽऽदीनां च सर्वत्राऽनुपलम्भात् तेषां वस्तूनां कृते न सर्वैः सर्वत्र गन्तुं शक्यम्। ततश्च क्रेतृ-विक्रेतॄणां मध्ये क्रयविक्रयाऽऽत्मकव्यापारकुशलाः वणिज उदतिष्ठन्। ते च तत्तद्वस्तूनि सञ्चिन्वन्तः ग्रामाद्ग्रामं देशाद्देशञ्च

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सम्भूय प्रतिष्ठमानाः सार्था इति व्यवह्रियन्ते स्म। तेषु च मुख्यास्सार्थवाहा इति प्रख्यामलभन्त।

गच्छता कालेन धूमशकटाऽऽदीनि यात्रासाधनानि समुद्गतानि। विद्युत्प्रभृतयः शक्तयः विज्ञानपरिशोधन-समुन्मेषाः अवातरन्। तत्प्रभाविताश्च महारम्भाः परिश्रमाः कोणे कोणे व्यवास्थाप्यन्त। ततश्च बहुधा परिणतरूपा नवावतारा आर्थिक - सामाजिक व्यवस्थितिः सर्वत्र कृतपदाऽऽभूत्। वृत्तिमूलाः गृहपरिश्रमाः भीतभीता इव पश्चात् न्यलीयन्त। मध्ये व्यापारकुशलानां वणिजां च संख्या प्रगुणिताऽऽसीत्। यद्यप्येतेषां वणिजां प्रारंभ-प्रोत्साहाऽऽदिवशात् दुर्लभान्यपि वस्तूनि ग्रामेषु नगरेषु च सर्वत्र सुलभान्यासन्। तथाऽपि स्वलाभमात्रदत्तदृष्टयः स्वार्थपराः एते ग्रामीणां राष्ट्रीयां च आर्थिकव्यवस्थां स्वहस्तगतामकार्षुः। एतदधीना हि वृत्तिमतामन्येषां च गतिः तत्तद्वस्तुक्रयविक्रयनिर्वाहविधौ।

अपिच सत्यसम्मिता असत्यप्राया मधुसम्भृताश्च वाच एतेषां वणिजां इति च अनूचानः प्रवादः। यन्मूलञ्च सित्यानृतं वणिग्भाव' इत्यमरसिंहोक्तमपि वाणिज्यलक्षणं सङ्गच्छते।

किञ्च लक्ष्मीश्च वृत्तिमतः कृषिपरांश्च क्रमशो 'वहाय मध्यस्थान् सुखेन लाभं गणयत एतान् वणिज

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आवहन्ती विलसती च। स्वकायकष्टमनु, फलमलभमाना अन्ये सर्वेऽपि वणिजां कटाक्ष - भ्रूभङ्गाऽऽदिभि र्नियमित-जीवनविधाः अलक्ष्मीविलासाः बहुधा दुःखान्यनुभुञ्जते।

वणिजो नाम द्रव्यपण्या एवेत्यपि नियमो नास्ति। ज्ञानपण्याः शास्त्रज्ञा अपि तादृशा एव। "यस्यागामः केवलजीविकायै तं ज्ञानपण्यं वणिजं वदन्ती"ति महाभारत-वचनात्। अनेन केवलजीविकानिर्वाहाय भोगाय च कृताः सर्वे समारम्भाः वाणिज्यकक्षां प्रविशन्तीति वक्तुं सुवचम्। "कृषि-गोरक्ष-वाणिज्य मिहलोकस्य जीवन" मिति महाभारतवचनमपीममेवार्थं सङ्गमयति।

एवञ्च इहलोकजीवनार्थे कृषि-गोरक्ष-वाणिज्ये-ष्वन्यतम माश्रयणीयम्; न कदाऽपि निर्व्यापारै र्भवितव्य-मिति ज्ञायते। वाणिज्यं च सत्यानृतात्मकम्; ततश्चाऽ-धर्मोत्तर मेवेति च प्रसिद्धम्। तादृशमनर्थहेतु वाणिज्यं कथं नामाऽऽश्रयणीयमिति शङ्काऽत्र समुदेति। तत्रेयं समाधिः शास्त्रेषु सम्मता विहिता। इदं हि वाणिज्यं स्वधर्मोपचितं सदेव इहपरकल्याणसाधनं भवति। अन्यथा स्वधर्म मनुपाश्रित्य केवलजीविकार्थे भोगैकदृष्टिभिः पशुकल्पैः स्वार्थपरैश्च समाद्रियमाण मिदं अधर्म्यं सत् अनर्थमूलमेव भवतीति निश्चप्रचम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यथाहि, सदसद्रूपे सत्यानृताऽऽत्मके वा जगति स्वैःस्वैः कर्मभिः पच्यमाना अपि स्व-स्वधर्मे नियतं वर्तमानास्सन्त एव धीराः प्रसिध्यन्ति; अजरामरं च पदं प्राप्नुवन्ति; तथैव सत्यानृताऽऽत्मके वाणिज्ये प्रवर्तमाना अपि स्वधर्मनिष्ठिता एव विवेकिनः प्रशस्यन्ते; स्व-कर्मभिः मुच्यन्ते च। धर्मव्याधकथा चाऽत्र प्रमाणम्।

धर्मव्याधो जन्मना व्याधोऽपि शान्तो दान्तः अहिंसा-परश्च आसीत्। सः स्वधर्मे नियतं वर्तमान एव पितृ-पैतामहं मांसविक्रयाऽऽत्मकं वाणिज्यं समाददे। धर्मभृतां वर इति च ख्याति माप। भद्रा वाचि लक्ष्मी स्तस्य सदा संनिहिता। धनधान्याऽऽदिलक्ष्मीसंपन्नोऽप्यसक्तः सुखमनुभुंक्ते स्म। जन्मना व्याधोऽपि ऋषिरेव त्वमिति कौशिकेन तपस्विना प्रशंसितश्च।

अतः वाणिज्य मिहलोकजीवनरूपं सर्वदा सर्वधा अनर्थ-परम्पराया द्वारमेवेति वक्तुं न शक्यते। यथाह्यर्थकामौ धर्मायैव भवतः न तु भोगाय, तथैव तौ पुरुषार्थौ भूत्वा श्रेयसे कल्पयतः। धर्ममूलेषु सर्वेष्वारम्भेषु लक्ष्मी स्सदा जागर्ति। स्वधर्मदूरः तपस्वी कौशिकोऽपि शांति नावाप। मोक्षलक्ष्मीदूरश्च चिखेद किल। किञ्च सम्पद्विनिमयेन इन्द्रदिलीपौ भुवनद्वयं दधतुरिति श्रूयते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तेन सम्पद्विनिमयाऽऽत्मकः क्रयविक्रयात्मको वा व्यापारः लोकधारणायैव भवेत्; न तु केवलं स्वोदरपूरणाय ।

अतः इहलोकजीवनार्थे विहिते वाणिज्ये स्वधर्म-सम्भृते सत्येव लक्ष्मीस्सर्वत्र देशे बहुधा कृतावतारा समुल्लसति । तथाविधमेव वाणिज्यं सर्वै रुपादेयम्; लक्ष्मीसंपन्नैश्च धर्मपरैः भाव्यम् ।

कृषिकर्म

— अष्टावधानी, चिलुकूरि रामभद्रशास्त्री

कृष विलेखने इति धातोः कृषिरिति रूपसिद्धिः कृष्यमाणत्वात् कृषिरिति —

लोके जनानां मुख्यः आहार एव, आहारं विना कोऽपि जन्तुर्नजीवति खलु, आहारसम्पादनायैव मानवैः व्यवसायः क्रियते - तत्राऽपि कृषि - गोरक्षणादयः सकल-वर्णाऽऽश्रमाणां निर्दुष्टजीवनोपायाः लसन्ति । एत-त्कृषिफलस्य मुख्यतमं साधनं वृष्टिःतदाह कालिदासः मेघसन्देशे —

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'त्वय्यायत्तं कृषिफल मिति भ्रूविकारानभिज्ञैः
प्रीतिस्निग्धैः जनपदवधूलोचनैः पीयमानः ।
सद्यः सीरोत्कषणसुरभिः ॥

इति एतेन कृषिफलार्थं वर्षणं मेघाधीनमिति ज्ञायते। मेघस्तु समुद्रजलं गृहीत्वा भूमौ सर्वत्र जलं दत्वा सस्यादीन्वर्धयति इति। "सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।"

इति कालिदाससूक्त्या रविरेव स्वकरैर्जलं गृहीत्वा मेघद्वारेण वर्षतीति सिद्धम् । लोकेऽपि —

कृषितो नास्ति दुर्भिक्षम् ।
जपतो नास्ति दुर्लभम् ॥

इति उच्यते। परन्तु जपतपोनुष्ठानाऽऽदिभिः वर्षं साधयन्ति वारयन्ति च यमिनः। तथैव सस्यमपि भूकर्षणाऽदिकं विना सम्पादयन्त्यरण्येषु मुनयः आटविकाश्च। गौतमोनाम महर्षिः स्वपत्न्या अहल्यया साकं वाणी-लक्ष्मी-गौरीरर्चयित्वा तदनुग्रहेण जलप्रोक्षणमात्रेण सस्यऽदिकं समुत्पादितवान्। ततः क्षामसमये सकलदेशाऽऽगतमुनिवरान् पितृ-भ्रातृ-सुत-गुरूनिव अन्नप्रदानेन सन्तर्पयामासेति गौतमीमाहात्म्ये प्रोक्तम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परं च वरुणजपं कृत्वा वृष्टि स्साध्यते। श्रीराम-मन्त्रजपात् रविमन्त्रप्रभावाद्वा वर्षनिरोधोऽपि प्रत्यक्षमनु-भूयते।

तथैव ग्रीष्माऽऽधिक्ये बाधति सति वरुणजपं यागं च कृत्वा विद्वद्वरैः वृष्टिःसाधिता। एतेन मन्त्रहुवनबलादेव वृष्टिः साधितेति ज्ञायते।

इदानीन्तु यन्त्रसाहाय्येन भूकर्षण - जलप्रोक्षण - सस्यकर्तन - तुषविघसनाऽऽदि सकलं कर्म कृत्वा तण्डुलानि साध्यन्ते।

"कृषितो नाऽस्ति दुर्भिक्ष" मिति नीत्या कर्षकस्य दुर्भिक्षं नाऽस्ति। तथैव जपतः दुर्लभं जगत्यस्मिन्न विद्यते।

कृषिकर्मणि प्रथमं बीजाऽऽवापः कर्तव्यः। तद्योग्य-कालः आषाढोमासः ग्रीष्माऽतपेन भूमि श्शुष्यति। तदा धरणीस्थिताः सकलदोषाः विनश्यन्ति। ततः दोषरहित-पृथिव्यां प्रारम्भवृष्टिपतनेन आर्द्रता भवति। तदा हलकर्षणयोग्या पृथिवी सम्पद्यते। तदा बीजाऽऽवाप-योग्यतां लभते। एतेन मानवाऽऽहारसृष्टौ भगवन्निर्णयोऽ-स्तीति ज्ञातव्यम्। तथैप मुनीना मप्याहारसम्पादनायैव पर्वतेष्वपि वर्षति मेघः। तथैव जलधिष्वपि वर्षति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कृषिसाधना अग्निहोत्रावसरपयोदानदक्षा गौ र्मातिव पोष्यते कर्षकैः ।

"गोमाता वितनोतु भद्रनिचयं लोके जनानां सदा" इत्युक्त्या गोप्रशस्तिः ! ज्ञायते ।

परं च कृषिर्नाम नैकं सस्यसाधनमेव। फलवृक्षाऽऽदिपोषणमपि कृषिरित्येव व्यवह्रियते। पुरा सस्याऽऽदीनां गो - वराहाऽऽदीनां मलादिभः बलवर्धकदोहदमृत्तिकाः निक्षिप्यन्ते। तथैव वृक्षादीनां दोहदप्रक्रियाः बहुविधाः वृक्षशास्त्राऽऽदिषु प्रोक्ताः। ताभिः दोहदक्रियाभिः स्वादिष्ठमारोग्यकरं च सम्पादयति सस्यम् : अधुना "एमोनिया सल्फेट्" इति पिष्टक्षेपणेन सस्याऽऽदयः क्षिप्रं पोष्यन्ते। तदाहारभक्षणेन रोगाः संभवन्ति। रोगवशात् आयुरारोग्यनष्टिः भवति। इत्थमेव आधुनिककृषिविलासो लसति। तस्मादर्वाचीनकृषिफलं न समीचीनम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

व्यायामः

— श्रीमान् कोगंटि सीतारामाचार्यः

सर्वेषामपि मानवानां सुखजीवनाय आरोग्यं अत्यन्तमावश्यकम् । आरोग्येण विना मानवः सर्वथा पतित एव । जीवन्नपि मृतकल्पः । न तेन सुखस्य लेशोऽप्यनुभूयते । अतः खलु "आरोग्यं हि महाभाग्यं नाम" इत्येव जनश्रुतिः श्रोत्रपथमधितिष्ठति । अरोगस्य भावः आरोग्यमिति व्युत्पत्त्या महते आयुरभिवृद्धिसाधनाय आरोग्याय मानवैस्सर्वैरपि तत्र प्रयतितव्यं विशेषतः । प्रधानतया व्यायामस्य जीवनाऽऽनन्दं प्रति कारणत्वात् ।

व्यामाम इति शब्दः 'वि' 'आङ' इत्युपसर्गद्वयपूर्वकात् 'यम' धातोः निष्पन्नः घञन्तरूपः । व्यायामपदस्यास्य अर्थः एवं वक्तुं शक्यते । दुर्व्यापारेभ्यः, दुरभ्यासेभ्यः, दुर्व्यसनेभ्यश्च मनसः निरोधः । प्रत्यक्षानुभवहेतोः मनसः निरोधात् तेभ्यो दुरुपसर्गपूर्वेभ्यः कर्मभ्यः तत्तदवयवानां निरोधोऽपि प्रसिद्ध एव ।

अपिच अस्य व्यायामशब्दस्य क्रीडाऽऽदयः अर्थो भवति । अस्मिन्नेव योगाभ्यासोऽपि अन्तर्भवति । तपोविशेषोऽपि व्यायामे अन्तर्भवतीति केचित् । परन्तु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नियमपूर्वकः परिश्रमविशेषः व्यायाम इति प्रशस्तः। व्यायामः शरीरस्य संरक्षणे प्राधान्यं वहति। ये ये मानवाः धर्मसाधनाय प्रयतन्ते तेषां यथायथं शरीरस्य संरक्षणं आवश्यकम्। तैश्शरीरसंरक्षणापेक्षया व्यायाम स्संसेव्यः। आरोग्यरक्षणविषये व्यायामस्य प्राधान्यात्।

अतएवोक्तं कविकुलगुरुणा कालिदासेन —

'शरीरमाद्यं खलु धर्मसाधनम्।'

इति। अपिच व्यायामशब्दस्यैव अर्थः एवं निर्णीतः वाग्भटेन। 'शरीरायासजनकं कर्म व्यायाम उच्यते' इति शरीरस्य आयासजनकः कर्मविशेषः व्यायाम इति।

अयमेव व्यायामशब्दः कालक्रमेण स्वान् तपोयोगाऽत्मकान् अर्थान् विहाय एतस्मिन् अर्थे रूढः। यथा पाठशालासु विद्यार्थिभिः प्रातस्सायं च क्रियमाणं स्वेदजनकं क्रीडाव्यपदेश्यं परिश्रमात्मकं कर्म इति।

तच्च उत्क्षेपण, अपक्षेपण, आकुंचन, प्रसारण, गमन, धावन, लंघनाऽऽत्मकं सर्वत्र व्यापृतं च। कन्दुकक्रीडाऽऽदयोऽपि कलाविशेषा इति व्यायामे परिगृहीताः। एवमेव सूर्यनमस्काराऽऽदयोऽपि। पद्माऽऽसनाऽऽदयश्च। सूर्यनमस्काराऽऽदयः तपोविशेषे अन्तर्भूताः। तेष्वपि बहवो भेदाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दृश्यन्ते। अर्थतः परामृष्टे व्यायामशब्दे एवं अर्थद्वैविध्यमापतति। ईश्वरविषयको व्यायामः तपोयोगाऽऽत्मकः। निरीश्वरविषको व्यायामः क्रीडाव्यपदेश्यः। तत्र आद्यमास्तिकानां अन्यदारोग्यमात्रविषयतया सर्वेषामपि।

'यद्दुष्करं यद्दुरापं यद्दुर्गं यच्च दुस्तरं सर्वन्तु तपता साध्य' मिति सेश्वरविषयकव्यायामत्वेन तपसः प्रसिद्धिः। सूर्यनमस्काराऽऽत्मकेन स्तोत्रेण मयूरो नाम महाकविः कुष्ठरोगात् विमुक्तः संपूर्णमारोग्यमवाप इति पंडितजनाऽऽदूतिः अद्यापि तत्प्रोक्ते सूर्यशतके। शतकं चैतत् संस्कृतशतकसाहितीभारतीमकुटायमानमिति न काचिदपि विप्रतिपत्तिः।

व्यायामविहीनस्य एते रोगाः प्रभवन्ति। अग्नौ जठरे मान्द्यम्। अवयवेषु दौर्बल्यम्। कर्मसु मुख्येष्वपि अलसत्वं। शरीरे मालिन्यप्रभवा कंडूतिः। एवमादयो बहवः। किञ्च गमनेन आयासः लम्बोदरत्वमिति। अल्पेऽपि वयसि वार्धकलक्षणानि इति अनर्थपरम्परा। व्यायामेन एतानि बहूनि प्रयोजनानि सम्पाद्यन्ते। लाघवं शरीरस्य। नैर्मल्यं रक्तस्य। सम्यक्प्रसारो रक्तस्य पटिष्ठता सिराणाम्। विचिवर्तनक्षमत्वमङ्गसंधीनां, मेधायाः शक्तिः इत्येवमादीनि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

व्यायामेन शरीरगतं रक्तास्थिगतं च मालिन्यं स्वेदरूपेण बहिर्गच्छति। स्पर्शानुकूलस्य वायोस्सेवनेन सर्वस्याप्यंगस्य निर्दुष्टता सम्पद्यते। तदा सुखं हि निद्राति। सर्वासु कलासु सर्वेषु कार्येषु च कुशली भवति। विषयग्रहणे धारणे च बुद्धेः विकासः एकाग्रता च सिध्यति। एवं जागरूको नरः अरोगो भवति।

अतः सर्वैरपि मानवैः वयसः अनुरूपो व्यायामः प्रत्य ं कर्तव्य एव।

ग्रन्थालयस्यावश्यकता

— दिवाकर्ल वेङ्कटावधानी

प्राचीनकाले ग्रन्थकर्तारः ग्रन्थान् तालपत्रेषु वा भूर्जपत्रेषु वा लिखन्ति स्म। ग्रन्थपठनेच्छवः महता प्रयासेन बहुदूरं गत्वा तान् ग्रन्थान् पठन्ति स्म। वाङ्मय-प्रिया राजानः, सम्पन्नाश्च गृहिणः विद्वद्भिर्लिखितान् कतिपयान् प्रमुखान् ग्रन्थान् निजगृहेषु निक्षिप्य श्रद्धया रक्षयामासुः। मुद्रणाऽऽलयस्थापनानन्तरं पिपठिषवस्सर्वेऽपि स्वल्पमूल्येन ग्रन्थान् क्रीत्वा पठन्ति। येन वाङ्मये रताः ते बहूनि पुस्तकानि क्रीत्वा गृहेषु संरक्षन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यस्मिन् गृहभागे पुस्तकानि निक्षिप्य पठ्यन्ते लेखनाऽऽदि वा क्रियते स पुस्तकाऽऽलय ति उच्यते। आंग्लभाषायां पुस्तकाऽऽलयस्य नाम 'लैब्ररी' इति कथ्यते। तत् पदं न केवलं ग्रन्थनिलयं, किन्तु ग्रन्थसंग्रहमपि बोधयति।

ग्रन्थाऽऽलयाः देशस्याभ्युदयाय मानवविज्ञानवर्धनाय च बहुधा कल्पन्ते। बह्व्यः पाठशालाः कालाशालाश्च संभूय यमभ्युदयं सम्पादयन्ति तं सर्वमपि ग्रन्थालय एक एव कर्तुं प्रभवति। धनिका दरिद्राश्च, बाला वृद्धाश्च, स्त्रियः पुमांसश्च यथेच्छं तत्र गत्वा विज्ञानं प्राप्नुयुः। ग्रन्थाऽऽलयेषु विविधविषया नधिकृत्य प्रतिभावद्भिः विद्वद्भिः विरचिता बहवः ग्रन्थाः स्युः। धनशालिन विद्याप्रिया जना अपि प्रत्येकं बहुसंख्यान् ग्रन्थान् क्रेतुं न शक्नुवन्ति। तस्मात् अनेकान् महाग्रन्थान् यद्येकत्र लब्धुमिच्छा स्यात्तर्हि ग्रन्थालय एव शरणीकरणीयः। ग्रन्थाऽऽलया अतीतेषु कालेषु ये प्रतिभासम्पन्ना विद्वांस अवर्तन्त तेषां अनर्घानि भावरत्नानि स्वसन्निधिं प्राप्तवद्भ्यो जनेभ्यः उदारा दातार इव यच्छन्ति स्म। तत्र भिन्न-प्रकृतीनां जनानां अनुगुणा बहवो ग्रन्था वर्तन्ते। तस्मात् पाठकानां यस्मिन् ग्रन्थेऽभिरुचिरस्ति तं गृहीत्वा पठितु-मानुकूल्यं भवति। यस्माद् ग्रन्थाऽऽलया रसवतां ग्रन्थानां निधानानि भवन्ति तस्मात्ते दुःखपूरितानां जनानां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मित्राणीवाऽऽश्वास मानन्दं चाऽऽपादयन्ति। सन्देह-निवारणार्थं विद्वद्भिरपि पठितव्यानि पुस्तकानि अधिक-मूल्यानि ग्रन्थाऽऽलयेष्वेव लभ्यन्ते। दिनभागे स्वस्व-कार्येषु व्यग्राः श्रान्ता जना स्सायंकाले ग्रन्थाऽऽलयेषु विश्रान्ति लभन्ते। तत्र तेऽभिमतान् ग्रन्थान् पठित्वा न केवलं विज्ञानं किन्तु विनोदमपि प्राप्नुवन्ति। यतो नवीना ग्रन्थाः विविधा वार्तापत्रिका अपि ग्रन्थाऽऽलयेषु निक्षिप्यन्ते ततः पाठका नूत्नपरिशोधनपरिणामान्, प्रपञ्चप्रवृत्तिं च विज्ञातुं पारयन्ति। विद्यार्थिभ्यो ग्रन्थालयः कल्पवृक्ष एव। यस्मादत्र तेषां सर्वे संशयाः निरस्ता भवन्ति।

ग्रन्थाऽऽलयेषु बहवो भेदास्सन्ति। केचिदर्था-नपेक्षकाः सर्वसामान्याश्च। केषुचित् पाठकाः मासि मासि नियतधनं दत्वा सभ्या भवन्ति। ते ग्रन्थाऽऽलयेभ्यः पुस्तकानि गृहं नीत्वा पठनानन्तरं परावर्तयन्ति। केषुचित् प्रदेशेषु प्रभुत्वप्रतिष्ठिता ग्रन्थालयास्सन्ति। सर्वे पौराः तत्र गत्वा यथेच्छं पुस्तकानि पठन्ति। पाठशालासु कला-शालासु च विविधविज्ञानमयग्रन्थनिधयः ग्रन्थाऽऽलयाः स्युः। अद्यतनकाले ग्रन्थाऽऽलयानां प्रामुख्यं ज्ञात्वा ग्रामेष्वपि तान् स्थापयितुं यत्नाः क्रियन्ते। पाश्चात्य-देशेषु ग्रामाद् ग्रामं संचरन्तो ग्रन्थाऽऽलया अपि सन्ति। केषुचित् पुस्तकाऽऽलयेषु हस्तलिखिताः तालपत्रलिखिताश्च

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ग्रन्थाः संगृह्यन्ते। एते लिखितपुस्तकभाण्डागाराणीति कथ्यन्ते। प्रपञ्चे विविधदेशेषु महान्तो जातीयग्रन्थाऽऽलया वर्तन्ते। अस्माकं देशे एतादृशः महान्तो ग्रन्थाऽऽलयाः कलिकाता – मद्रपुरी इत्यादि नगरेषु विराजन्ते।

पाठशालासु ग्रन्थाऽऽलयानामपारं प्राधान्यमस्ति। यथा हृदयं शरीरे विविधावयवेभ्यः आवश्यकानुगुणं रक्तं प्रसारयति तथा ग्रन्थाऽऽलयोऽपि विद्यार्थिभ्यः विविधेभ्यः तत्तत्सामर्थ्यं मावश्यकं चानुसृत्य विज्ञानं विसरति। तस्मात् पाठशालाऽधिकृताः पाठशालाहृदयसदृशानां ग्रन्थाऽऽलयानां विषये न कञ्चिदपि लोभं कुर्वीकन्। ग्रन्थाऽऽलय विहीनासु पाठशालासु विद्या असमग्रा भवतीत्यत्र न सन्देहलेशोऽपि। अतः पुस्तकसंग्रहणेऽनल्पा जागरूकता प्रदर्शितव्या। सद्ग्रन्था यावती मुपकृतिं कुर्वन्ति। दुर्ग्रन्थाः तावतीमपकृतिं कुर्वन्ति। तस्माद् दुर्नीतिबोधका उद्रेकजनकाश्च ग्रन्था ग्रन्थालयेषु न कदाचिदपि संग्राह्याः।



CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

धनमूलमिदं जगत्

— कोडूरि वासुदेवशास्त्री

इदं चाभाणकं वाल्मीकिरामयणे विराजते। लक्ष्मण उवाच श्रीरामचन्द्रं प्रति; —

"धनमार्जय काकुत्स्थ! धनमूलमिदं जगत्।
अन्तरं नाऽभिजानामि निर्धनस्य मृतस्य च ॥"

इति। सत्यं निर्धनानां मृतानां च साम्यं दृश्यते लोकवृत्तेष्वस्माभिः। अत एव निर्धनो मृतश्चैकरूपाविति व्यवह्रियेते। लोके चराचरवस्तुषु धनमेव प्रधानं स्थानमधितिष्ठति। विना धनेन किमपि कार्यमैहिकमामुष्मिकं वा सात्रयितुं न पारयामो वयम्। प्रातरारभ्या, आनिशं जननमारभ्य आमरणं धनमेव कृत्स्नां लोकयात्रां प्रचालयति। अतो ज्ञायते धनमेव सर्वस्यापि निदानमिति।

अन्यच्च पश्यामो वयं यत् संघे तु धनहीनं मानवं न बहुमन्यन्ते। अर्थहीनं पुरुषं बान्धवा रपि दूरीकुर्वन्ति। निर्धनं पुत्रा अपि "मत्पिता ऽस्मदर्थमधिकं धनं न संपदयामासे"ति दूषयन्ति। भार्याऽपि तानुसरति वित्तहीनं पतिम्। एवं धनस्यावश्यकता को वा सर्वेषु कालेषु समस्तेषु च नानुमोदते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अपिच प्रापञ्चिक कार्यविमुखा महात्मान स्सर्वसङ्ग-परित्यगिनोऽपि सर्वत्राटयन्ते वित्तवाञ्छया। किमुत प्रापञ्चिकधर्मानुगता रिक्ता मानवाः! चतुर्षु पुरुषार्थेषु धर्मार्थकाममोक्षाख्येष्वर्थस्यैव प्रामुख्यं पश्यामः। अर्थमेकं कारणीकृत्यैवान्ये पुरुषार्थाः चरितार्था भवन्ति। विनाचा-र्थेन धर्मकामयो रनुष्ठानस्यैवासंभवात्। अतोऽर्थमूलं जगदिति सुनिश्चितो विषयः। अर्थवान् रूपहीनोऽपि सुन्दरो दृश्यते। कुलहीनोऽपि कुलीनो गण्यते। अपण्डि-तोऽपि पण्डितो भाव्यते। एवं परिपाटी सर्वत्रानुभूयतेऽ-स्माभिः।

अथच, केचिद्धनलुब्धाः, आजन्मप्राप्तं स्वीयं सम्प्र-दायमपि दूरीकुर्वन्ति। अन्ये च धनवाञ्छया धैर्यौ-दार्यगाम्भीर्यादीनुत्तमगुणानप्यधः पातयन्ति। अन्येचा-र्थैकदासाः, सुकृतविशेषोपपन्नमत्युत्तमं शीलमपिनाशयन्ति। एवंविधा धर्मापेतबुद्धयो येन केनाप्युपायेन वित्तार्जनमेव परमं धर्मं मन्यन्ते। अपि च एकेन वित्तेन सकलार्थ-साधकेन, न तुला मारोहन्ति धर्मादयो निस्सारा इति सिद्धान्तीकुर्वन्ति च स्वीयं चरितम्। एवं वित्तस्य सम्पा-दनमनिवार्यं परिदृश्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ततश्च, सभासु गौरवं, राज्यशासने उच्चस्थान-प्राप्तिः, संघे च महती कीर्तिः, इत्यादयो धनेनैव संपादयितुं सुलभा इति पश्यामः। अतो भवत्यन्यस्य कस्यापि नैतादृशं प्राबल्यं धनादृते, लोके।

परन्तु, स्मृतिकर्ता मनुराह —

"अर्थाना मार्जने दुःखं, आर्जितानां च रक्षणे।
आये दुःखं, व्यये दुःखं धिगर्था दुःखभाजनम्॥"

इति। यद्यपि धनस्य संपादने श्रमस्संजायते। संपादितानां संरक्षणे कष्टं परिदृश्यते। तेषामभिवृद्धिकरणे ततोऽपि बाधाऽनुभूयते। किं च विनाशे त्वर्जितस्य वित्तस्य प्राणोत्क्रान्ति दुःखसदृशं दुःखं संपद्यते। अतो धनं सर्वधा दुःखभाजनं भवति। तेन 'अर्था निन्द्या भवन्ति' इत्येतद्वचनस्य मुमुक्षुविषये वा, अशक्तविषये वा तात्पर्यमवगच्छामः।

एवं च जगदुपयोगि धनं संपाद्यताम्। तद्व्ययः परं, धर्मादनपेतेन पथा क्रियताम्। धनानां व्ययस्त्रिधा सम्पद्यते। एको व्ययः, धनस्यार्थिसात्करणात्, अपरो व्ययः भोगः, अन्यश्च व्ययः, नाशः इति। अत स्संपादितानामर्थानां दानेन गति रुत्तमा, आत्मभोगेन मध्यम

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गतिः, चोराद्यपहरणेन गति रधमा च संभवति। अतः धनस्य त्याग-भोगौ यः न करोति तस्य धनस्य तृतीया गतिः अर्थात् नाशो भवति। अत्र स्मरामाऽभियुक्त-वाक्यम् —

"चत्वारो धनदायादा धर्माग्निनृपतस्कराः।
तेषां ज्येष्ठावमानेन त्रयः कुप्यन्ति सोदराः॥"

इति। अतो मानवैरर्थसंपादनपरैर्भाव्यम्। अर्थवद्भिश्च धर्मदानशौण्डैश्च भाव्यम्।

गान्धिमहाशयः सत्यदीक्षितः

"आर्षविद्याभूषण" जटावल्लभुल पुरुषोत्तमः

गांधिमहाशयः सत्यदीक्षित इति सुविज्ञातम्। तेन सत्यव्रतं स्वीकृत मित्यत्र काचन गाथा वर्तते। तेन कस्यांश्चिद्रात्रौ हरिश्चन्द्रनाटक मामूलाग्रं दृष्टम्; अनन्तरमेवं निश्चितं "सत्यपालनार्थं हरिश्चन्द्रमहाराजेन अनल्पानि कष्टान्यनुभूतानि। कुतो वा मयाऽपि क्लेश-सहस्रं सोढ्वाऽपि सत्यव्रतं न पालनीयम्? इतः परं न कदाऽप्यनृतं वदिष्यामि" इति। न पुनर्जीविते कदाऽपि सः एतच्छपथं विसस्मार। तस्य आनन्तरिकाऽध्यात्मिक

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

महत्त्वस्य एतदेव बीजमासीत् । "सत्यान्नास्ति परो धर्म" इत्यार्षोक्तिः अस्ति खलु । एवं पुराणकथाप्रभावितं गांधेः माहात्म्यम् । यदा गांधिः न्यायशास्त्राध्ययनार्थ-मांग्लदेशं गन्तुमुद्युक्तस्तदा तन्माता एवमवदत् । "तात पाश्चात्यदेशीयाः प्रायशो मद्यमांससेविन इति श्रूयते । तन्मध्ये वर्तिष्यमाणस्य तव तद् दुर्व्यसनं माभूत् । अद्य त्वया शपथः कर्तव्यः 'न मांसं खादिष्यामि, न मद्यं पास्यामि, न परवनितां स्प्रक्ष्यामि' इति । गांधिः क्षिप्रमेव तथा प्रतिज्ञातवान् । तां च प्रतिज्ञां साकल्येन पर्यपालयत् । एवं सः "आम्राश्च सिक्ताः पितरश्च तृप्ताः" इति न्यायेन मात्राज्ञां पर्यपालयत्; मद्यमांस - परस्त्रीवर्जनरूपमहा-व्रतमपि चचार, येन सः तादृशपवित्रस्सम्पन्नः ।

"कामये दुःखतप्तानां प्राणिनामार्तिनाशन" मितीय मार्तिर्महात्मनां नैसर्गिकी । गांधिमहाशयस्य आर्तिप्रेरिते एव राजनीतिप्रवेशः - सर्वजनहितप्रवृत्ती आस्ताम् ।

दरिद्रेऽस्मिन् देशे बहुसंख्याकेषु जनेषु अन्नवस्त्रहीनेषु सत्सु, इतरेषां वस्त्रोल्बणं, अत्यशनञ्च पापाऽवहमिति तस्याशयः । द्वयोः पर्याप्त आहार एकेन नात्तव्य इति तस्य बोधः । स्वयञ्च सः अल्पवस्त्रधारी, अल्पाऽऽहारश्च आसीत् लोके बहवः दीनजनबन्धवस्सन्ति । किन्तु एता-दृशसूक्ष्मविचारविलसितकारुणिकप्रवृत्तिपरा अतीव विरळाः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

"दुर्जनैः क्रियमाणं दुर्बलजनपीडनं साधुभिर्न ोढव्यं; अवश्यं निरोद्धव्यं; सोऽपि निरोधो दौर्जन्यरहितो वेत् ।"

पीडितजनोद्धरणमधिकृत्य गान्धेरथ माशयः । क्षिणाफ्रिकादेशे श्वेतजातीयैर्भारतीयेषु क्रियमाणमपमानं तवारयितुं सः बहुधा प्रायतत । एकदा सः श्वेतैः धिरस्रावपर्यन्तं ताडितः, कारागारबद्धश्च । अनन्तरं ः अकिञ्चनव्रतं स्वीकृत्य आंग्लेयहस्तेभ्यो भारतदेशं ोचयितुं तीव्रतरं सात्त्विकं समरं निरवहत् तत्र बहुजना-तमन्वसरन् । पीडितानां च सङ्घानां समुद्धरणाय स हुधा प्रावर्तत । आपन्नार्तिप्रशमनपरा हि महात्मानः ।

परमेश्वरे गांधेः परमा भक्तिः । ईश्वराऽऽज्ञां विना किञ्चिदपि जगति प्रचलतीति तस्य दृढो विश्वासः । पिच सः निरन्तररामनामस्मरणपरायणः । भगव-संस्मरणं भवतरणाय परमं साधनं खलु । अस्मिन् षये सः भगवद्गीतोपदेशजागृत हृदयः ।

एवं गांधेर्माहात्म्यं बहुमुखं, बहुमार्गोपार्जितञ्च ।



CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

माघे सन्ति त्रयो गुणाः

शतावधानी पिशुपाटि सुब्रह्मण्यशास्त्री

पुरा ऋषभो नाम स्वायम्भुवमनुवंशीयो महामुनिरवर्तत। तस्य वेदपारगाः स्सुताश्शतमासन्। तस्मिन् बभूव भरतो नाम सुतः नारायणपरायणो ज्येष्ठःश्रेष्ठः आसीत्। भरतं तं ब्रह्मविदामग्रेसरं ब्रह्मविदो वदन्ति स्म। तस्य नाम्ना विख्यातोऽयमजनाभवर्षो भरतवर्ष इति। अधुनातना एनमेव भाषन्ते भारतदेश इति, अत्रत्या भारतीया इति च। अस्मिन् भारते देशे पुरा व्यासवाल्मीकिप्रभृतयो वसन्ति स्म। ते सर्वज्ञाः कवीश्वराः। तेषु वाल्मीकिनामा महामुनिः श्रीमद्रामायणाऽऽख्यं महाकाव्यमादौ रचयामास। ततःप्रागेवं छन्दोमयी वाणी मनोहारिणी न कस्यापि मुखतो निस्ससार। अत एत मुनिरयमाद्यो महाकविरिति, तत्काव्य मादिकाव्यमिति च विदुषां निश्चयः। एवमेव महर्षिव्यासनिर्मितः महाभारतग्रन्थः। आदिकाव्यमिद मधीत्य, संपाद्य वैदुष्यं महाकाव्यानां कर्तारः बहवो बभूवुः। तेषु माघ - भट्टबाण - भव भूति कालिदासाद्याः नित्यमस्मच्छ्रवणपथं गताः कवीन्द्राः। तदनु कालक्रमेणानयोः बृहत्काव्ययोः विविधाः कथा अनुसृत्य तदानीन्तना मेधाविनो महाकवयः कालि-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दासाद्या व्यरचयन् बहूनि सर्वकाव्यगुणसमन्वितानि बालानां व्युत्पत्त्याधायकानि काव्यानि। तेषु च रघुवंश-कुमारसंभव - मेघसन्देश - किरातार्जुनीय - शिशुपालवध-नामधेयानां माघभारविकालदासप्रणीतानां पञ्चकाव्याना-मेव महतां मनीषिणामामोदमुद्रा अस्ति। अत एव बहो:कालादारभ्यैतावत्पर्यन्तं गीर्वाणविद्याऽभ्यासपरेभ्यो बालेभ्यस्तान्येव पञ्चकाव्यानि पठनीयानि भवन्ति। पञ्चकाव्यपाण्डित्यमूलमेव सकलकाव्यदर्शनाऽऽदिजन्यं विज्ञानम्। तत्रापि शिशुपालवधाऽऽख्यं पञ्चमं महाकाव्यं माघकविरचितं माघकाव्यापरनामधेयं विजयते विद्यार्थि-कल्पद्रुमभूतम्। अत्र साहित्यविद्याविभवो नवनवायते। अत्रानुक्तश्शब्दस्सर्वत्रानुक्त एवेति विचक्षणानामाशयः। अत एव 'नवसर्गे गते माघे नवशब्दो न विद्यते' इत्यभि-युक्तोक्तिस्संगच्छते। सकलदर्शनपारङ्गतत्वमस्य माघकवेः काव्येऽस्मिन् सर्वत्र स्फुटीभवति। अस्य शैली अक्लिष्टा मनोहरा च। अस्य काव्यस्य व्याख्याता कोलाचल-मल्लिनाथसूरिरपि 'माघे मेघे गतं वयः' इत्युक्त्वा काव्य-स्यास्य वैशिष्ट्यं विशदीचकार।

किं च रघुवंशे (१) 'प्रांशुलभ्ये फले लोभादुद्बाहु-रिव वामनः' (२) 'आसीन्महीक्षितामाद्यः प्रणवश्छन्दसा-मिव' (३) 'अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम्' एवं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शाकुन्तले पञ्चमाङ्के 'मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम्' इत्यादिषु ललितललिता उपमाऽलङ्काराः । एवं सहृदयहृदयाऽऽह्लादकराणा मुपमाऽलङ्काराणां प्रचारतरप्रयोग एव कालिदासरचनायां प्रधानो गुणः । तथैव किरातार्जुनीये (१) कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना । विभज्य नक्तं - दिव मस्ततन्द्रिणा, वितन्यते तेन नयेन पौरुषम् । (२) प्रभवः खलु कोशदण्डयोः, कृतपञ्चाङ्गविनिर्णयो नयः । स विधेयपदेषु दक्षतां, नियतिं लोक इवानुरुध्यते । इत्यादिषु भारविनामा महाकविः पदेपदे गूढतरान् बह्वर्थान् योजयामास । — एवं दशकुमारचरिते, (१) अर्धरात्रे निद्रानिलीननेत्रे परिजने विजने शोकपारावारमपारमुत्तर्तुमशक्नुवती, सेनानिवेशदेशं निश्शब्दलेशं .... (२) नीहारकरकिरणनिकरसम्पर्कलब्धावबोधो मागधः .... इत्यादिषु दण्डिनामा महाकविः श्रोत्रपेयमंत्यानुप्रास - मुक्तपदग्रस्ताऽऽदि बहुविधपदबन्धलालित्यं दर्शयामास ।

एतावता, उपमोपयोगे निरुपमः कालिदासः । अर्थगौरवयोजने भारविः प्रशस्यतरः । ललितपदबन्धने दण्डिकविरखण्डप्रज्ञः इति फलितोऽर्थः । एवं महाकवीनां काव्येष्वप्येक एव विशिष्टगुणो दृश्यते । प्रकृते ते शिशु-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पालवधाऽऽख्ये न केवलमेक एव गुणः तथा विशिष्टो दृश्यते, किन्तु उपमालङ्कारवैचित्र्यं, अर्थवैभवं पदबन्ध-लालित्यं चेति गुणत्रय मनुपदं पश्यन्ति मनीषिणः। काव्यादस्मात् स्थालीपुलाकन्यायेन पञ्चषाः श्लोका उदाह्रियन्ते ।

(१) नालम्बते दैष्टिकतां, न निषीदति पौरुषे ।
शब्दार्थौ सत्कविरिव, द्वयं विद्वानपेक्षते ॥

(२) अनुत्सूत्रपदन्यासा, सद्वृत्तिस्सन्निबन्धना ।
शब्दविद्येव नो भाति, राजनीतिरपस्पशा ॥

अत्र उभयोः - श्लोकयोः उपमालङ्कारः अर्थगौरवं च वरीवर्ततः भारविकालिदासकृती अतीत्य । एवं —

(३) 'अगण्यपण्य । पूर्वापणा विपणिनो विपणी र्विभेजुः ।

(४) कटकटाहतटाग्निमंक्षोः मंक्षूदपातिपरितः पटले-रलीनाम् ।

(५) परिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया, चलितया विदधे कलसमेखलाकलकलोऽलकलोलदृशाऽन्यया ।

इत्यादिषु ललितपदबन्धवैभवं दण्डिनः पदलालित्य मतिक्रामति । अत एत 'उपमा कालिदासस्य, भारवे-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रर्थगौरवम् । दण्डिनः पदलालित्यं, माघे सन्ति त्रयो गुणाः ।' इत्यभियुक्तोक्तिराप्तैर्विचक्षणैः परिशील्य प्रकाशिता । अत एव सकलगुणसुगन्धिसुमसमुल्लसितमिदं माघकाव्यं शिरोभिरुह्यते माल्यमिव मनीषिभिः ।

कालिदासः शृंगारकविः

विद्याप्रवीण, विद्वान् मद्दुलपल्लि सत्यनारायणशास्त्री

महदिदमस्माकं प्रमोदस्थानं यदद्य भारतभारतीविलासः कालिदासः सुधाकर इव सुविदितोऽपि जिज्ञास्यते । न केवलं 'भारतदेशः' इति शब्दश्रवणमात्रेणैव वाल्मीकि - व्यासाविव कालिदासः समेषां स्मृत्यारूढो भवति किन्तु प्रवृत्ते सारस्वतप्रसङ्गे खण्डपञ्चकेऽप्ययं सुकृती सहृदयानां हृदयसीम्नि सर्वमपि कविसमुदय मर्वाचीन मवरुध्य पुरतस्सविलासमाविर्भवति । कोऽसावत्र हेतुः । लोकोत्तरं सर्वमानवहृदयाऽऽवर्जनं विनात्र न किमपि दृश्यते । तदावर्जने च स्वीयकवितागतमतिलोकं माधुर्यमेव निमित्तम् । तन्माधुर्ये च मुख्यं कारणं सत्यपि सुकविता ललितसामग्र्यात्मके अन्यस्मिन्निमित्ते सकलप्राणिसुलभशृङ्गारोपबृंहितत्वमेव । तस्मादिमं कविकुलावतंसं शृङ्गारकविं मन्यामहे वयम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'शृङ्गार एक एव रसः' इति महाराज श्रीभोजदेवः व्याजहार। भारतावनावस्थां आद्यं लौकिकं छन्दः शृङ्गाररसभंगजनितनिर्वेदाऽऽविर्भूतमेव। षट्सहस्रीकारं भरतमुनिमारभ्य आधुनिकाऽलङ्कारिककविकुमारपर्यन्तं रसप्रसङ्गे अयं रसः कनिष्ठिकामेवाधिष्ठाय संश्रूयते। किंपुनस्सहस्रेण। सृष्टावस्थाजांडस्य स्रष्टुः प्रीतिः, लीला, विनोदः इत्यादि शृङ्गारापरपर्यायभाव एव निमित्तमित्याकलयन्ति प्राज्ञाः। तदेवमस्य रसस्य प्राधान्यं दरीदृश्यते। ततः 'महोन्नत' मितिपदेन गौरीशिखरमिव, 'अतिगम्भीर' इतिपदेन रत्नाकरमिव, 'अच्छ' मिति पदेन मानसं सर इव 'शृङ्गारकवि' रितिपदेन काळिदास मप्यलंकृतं करवाम। सोऽयं काळिदासः न केवलं शृङ्गारकविः परन्तु कविकुलावतंसः सकलकलाऽभिज्ञः शब्दब्रह्मवित् नवरसपोषणकार्मणः सारस्वतरहस्यपारदृश्वाचेत्याघोषयन्ति, संमोदन्ते च संस्कृतहृदयाः प्राच्याः प्रतीच्या अपि।

प्रथममस्य कविराजहंसस्य चरितं किञ्चिदिव परामृश्य, ततः शृङ्गारकवितां दिङ्मात्रं विचारयामः। "इत्थं जेगीयमानसुकवितावैभवोऽयं कवितल्लजः किंदेशीयः? महतोऽस्य विज्ञानरत्नराशेः प्रभारिञ्छोळिभिः कतमं कुलं समवभासि? कौ वा कृतपुण्यौ दम्पती अस्य जनुषा धन्यगार्हस्थ्यावजायेताम्? कः कालोऽस्य मधुरसार्द्रमञ्जरी मञ्जुलाभिर्गीर्भिः अतिवेल मामोदं व्यतनुत?" इत्येवं

17

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पार्वतीवर्णनं, तृतीये "मधुद्विरेफः कुसुमैकपात्रे...., पर्याप्त-पुष्पस्तवकस्तनाभ्यः .... इत्यादिवसन्तविजृम्भणवर्णनं, किञ्च शिवमाराधयन्त्या उमायाः "अशोकनिर्भर्त्सित-पद्मरागं, आवर्जिता किञ्चिदिव स्तनाभ्यां, स्रस्तां नितम्बादवलम्बमानां...." इत्यादि चेष्टाऽलङ्करणसौन्द-र्यादिवर्णनं, पञ्चमे पार्वतीतपःपरीक्षादिकं, सप्तमे "क्षीरोदवेलेव सफेनपुञ्जा ... आलोकमार्गं सहसा व्रजन्त्याः कस्याश्चित् .... तयोस्समापत्तिषु कातराणि ...." इत्यादिना गौरीशङ्कर – कल्याणकथांशवर्णनं च शृङ्गाररसभूयिष्ठ-मेवावभाति। अष्टमसर्गे शिवयोः परां काष्ठामापन्नस्य संयोगशृङ्गारवर्णनस्य परमो अवधिः "चुम्बनेष्वधर-दानवर्जितं...., यन्मुखग्रहणमक्षताधरं दत्तमव्रणपदं...., दष्टमुक्तमधरोष्टमम्बिका वेदनाविधुतपाणिपल्लवा...., लोहितार्कमणिभाजनार्पितं कल्पवृक्षमधु...." इत्यादिवर्णन-मतितरां शृंगाररससागरे निमज्जनोन्मज्जनानि कारयति पाठकान्। महाकविरित्थं कुमारसम्भवे मधुरं शृंगाररसं सर्वांगसुभग मुपवर्ण्य, मधुरतरं विप्रलम्भशृंगारं मेघ-सन्देशे समुत्तालतरंगित मकार्षीत्।

यत्र जडा अपि पदार्थाः जाड्यमपहाय, चैतन्यमादाय शृंगारभावसंवलिताः विस्मयमापादयन्ति। नद्योपि नव-संगमत्रपाविक्लबा नवोढा इव दृश्यन्ते। तदिदं मेघसन्दे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

काव्यं रसभृंगारमेव । किं बहुना यस्मिंश्च अलका-चित्रकूटस्थयोः यक्षकान्ताकामिनोः आचित्रकूटादा-कैलासं, आकैलासा दाचित्रकूटं अन्योन्याभिमुखं प्रसृतयोः अनुरागरसवाहिन्योः सम्पर्कबलादिव मार्गस्थाया स्सर्वस्या अपि प्रकृतेर्विलसितं श्रृंगारविक्रियावल्गितमेवाऽभासेत् । सोऽयं मेघसन्देशः श्रृंगाररसरत्नाकर इव चकास्ति । तत्र "तस्याः किञ्चित्करधृतमिव प्राप्तवानीरशाखं...., तस्योत्संगे प्रणयिन इव स्रस्तगंगादुकूलां...., अंगेनांगं प्रतनुतनुना गाढतप्तेन तप्तं...., उत्संगे वा मलिनवसने सौम्य निक्षिप्य वीणां ... श्यामास्वंगं चकितहरिणीप्रेक्षणे दृष्टिपातं...." इत्यादयः श्लोकाः अतितरां रसिकहृदयानि सम्मोहयन्ति ।

नवरसप्रचुरेऽपि रघुवंशकाव्ये - सुदक्षिणा - दिलीपयोः दाम्पत्यवृत्तं, इन्दुमतीस्वयंवरः, अजविवाहवर्णनं, रामचरितं, अन्ततः अग्निवर्णस्य विशृङ्खलश्रृंगारविस्रम्भ-विलासविहाराऽऽदिकञ्च श्रृंगारप्रायमेवावभाति । जगत्प्रसिद्धमस्य नाटकत्रयं श्रृंगाररसप्रधान मित्यत्र न कोऽपि विवदते । मालविकाऽग्निमित्रयोः, ऊर्वशी - विक्रमयोः, शकुन्तलादुष्यन्तयोः चक्षुप्रीत्यादिरूपेणांकुरितः श्रृंगार अन्ततः परां पुष्टिमवाप्य फलितः ब्रह्मानन्दसदृशं रसानन्दं नयति सहृदयानाम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रकृतिवर्णनपरे ऋतुसंहारे, पूर्वोक्तेतरकाव्येषु च आमूलचूडं शर्करायां माधुर्यमिव सहृदयहृदयाऽऽवर्जनदक्षं सौहित्यसौन्दर्यं समुन्मिषत्येव सर्वत्र ।

तस्मात् तत्तादृशमहाकाव्यस्य कर्तारं रसब्रह्माणं, प्रकृतिसौन्दर्यब्रह्मोपासक मस्मत्कविकुलचूडाचन्द्रं काळिदासं श्रृंगारकविं कलयेम । इममेवार्थममी रसिककविगीता: श्लोका: उपबृंहयन्ति ।

"साकूतमधुरकोमलविलासिनीकण्ठकूजितप्राये ।
शिक्षासमयेऽपि मुदे रतलीला काळिदासोक्ति: ।।"
(गोवर्धन:)

"निसर्गामलवाक्यस्य काळिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ।।"
(बाण:)

....
भासो हास: कविकुलगिरां काळिदासो विलास: ।
....
.... ॥" (जयदेव:)

तदयं "काळिदास: श्रृंगारकवि:" इति कथनं नापूर्वम् ।

"सरस्वती श्रुतिमहतां महीयताम्"

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चलनचित्रम्

कोट सुन्दररामशर्मा, M.A., M.OL., M.Ed.

विदितमेव खलु सर्वेषां यत् कलाः प्रकृतेरनुकृतय इति। अनेकविधासु कलासु ललितकलानां स्थानमुपरितनमित्यप्यंगीकृतमेव। पुनतेतासां ललितकलानां चित्रकला चक्षुस्तर्पणहेतुः झडिति मनोहारिणी विलसति। चित्रकला तु भूयो, वैज्ञानिकानामनुसन्धानस्य फलतश्चलनचित्ररूपं धृत्वा बहुकालपर्यन्तं जनानामाह्लापकारिणी बभूव। रूपस्य वाण्याश्च संगतिराधुनिकचलनचित्रस्य विनूत्नतामापादितवती सर्वेष्वपि देशेषु सम्भाविता च भवति। अस्माकं च भारते प्रतिवर्षं योग्येभ्यो नर्तकेभ्यो पुरस्काराश्च दीयन्ते। कथा – लेखक - संगीतदर्शक छायाचित्रग्राहकाऽऽदिभ्यश्च प्रशंसापूर्वकसम्माननानि क्रियन्त एव सर्वकारेण, अन्यैरपि कलाऽभिज्ञैस्समोजैश्च। यत् पूर्वस्मिन् समये नाटकस्य स्थानं 'कान्तं ऋतुं चाक्षुष' मिति महाकविना कालिदासेन अभिवर्णित्, तस्यैव कश्चिदंशः चलनचित्रेण स्वायत्तीकृतमित्यपि ज्ञेयम्।

यद्यपि चलनचित्रस्य एतादृक् स्थानं साधाणरतया दत्तं तथाऽपि अस्मिन्विषये कश्चिदभिप्रायभेदो वर्तते। तन्मतमनुसृत्य नर्तकानां यत् स्वाभाविकनटनाचातुर्यं तस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पूर्णरूपप्रदर्शनावकाशो न विद्यते चलनचित्रेषु। ते पुनर्वदन्ति कोऽपि वा काऽपि वा गायति अन्यो वा अन्या वा ओष्ठस्पन्दनं करोति यदतीव कृत्रिमताऽऽपादकमेव। यतः भूमिकारचना अनुवर्त्य परम्पराहीनं पार्थक्येन कथा-वस्तुन अंशाः छायाचित्रैर्गृह्यन्ते; अपरस्मिन्नेव काले विविधां-शानामाकलनं क्रियते। एतदपि अस्वाभाविकमेव। छायाचित्रार्थं यो बलवान् प्रकाश उपयुज्यते तस्य नर्त-कादिकानां नेत्रयोरुपरि दुष्प्रभाव आपतति। दर्शकानां च विषये निमेषस्य षष्टितमे अंशे षोडशचित्राणां प्रदर्शनेन कतिपयैरेव दिनैः दृष्टिरुजाऽपि जायत इति। कथावस्तु-दृष्ट्याऽपि वैदेशिकचित्रप्रभावो यदस्मदीयानां भारतीय-चित्राणामुपरि प्रपत्य प्रेक्षकमनस्सु सन्मार्गदूरतामेव शिक्षयति इति च।

अन्ये च एतादृशानां आक्षेपाणां समाधानं ददत्येव। एते इत्थं ब्रुवते; येन केनापि प्रकारेण चलनचित्रनिर्माणं भवतु नाम। फलमेव प्रेक्षकाणामभिप्रेतम्। तस्मात् नर्तकानां अस्वाभाविकनटनं, तेषामनामयभंगादिकं च न चिन्तनीयम्। न प्रत्यहं कोऽपि चलनचित्रं पश्यति यतो नेत्ररोगः शङ्क्यते। कुचित्रादिवारणार्थं सर्वकारेण नियुक्ता काऽपि चलनचित्रसंशोधनसमिति वर्तत एव। अतो दोषा उपर्युक्ता न स्वीकार्याः। लाभाश्च चलन-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चित्रद्वारेण कत्यपि प्राप्यन्त एव। स्वादेशिका, वैदेशिकाश्च, विद्या, क्रीडेत्यादिनैकक्षेत्रेषु या वार्ता: प्रचलन्ति, तादृग्गोचरीक्रियन्ते, तद्वारा एकवारमेव अनेकानां कृते बोधकताविषये सहकुर्वन्ति एतानि चित्राणि। एवमपि चलनचित्रलाभो वर्ण्यते यदल्पीयसैव पणेन सामान्यजनता द्रष्टुं शक्नोति विद्याऽऽदिसंबंधि अनेकविषयजातं पौराणिक-सामाजिककथाजालं चेति। समाजे ये दोषा वर्तन्ते तेषामपि प्रदर्शनं कृत्वा सन्मार्गमेव प्रेक्षकेभ्यो दर्शयति। इदमपि न चिन्तनीयं यन्नाटकानां अधोगति: एतै श्चित्रै रेव कल्प्यत इति, यत: नाटकस्यापि पोषणं सर्वकारेण अन्याभि: संस्थाभि: अनेकधा क्रियत एव। एवंविधे दृष्टिभेदे सति, चलनचित्राणा माधुनिकसमाजस्योपरि दुष्प्रभावो न पतिष्यति, यदि मतिमद्भि: समालोच्य निवारणोपाया: सूच्येरन्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अज्ञातकुलशीलस्य वासो देयो न कस्यचित्

— ति. कं तिरुवेङ्कटाचार्यः

मनुजस्य गुणेषु कुलस्य महान् प्रभावो भवति। विद्यासंस्कारः परिसरप्रभावश्च वंशपरम्पराजन्यस्य गुणस्य अन्यथाकरणे विपरिणमने वा अशक्तौ भवतः। निम्बवृक्षः शर्करया कृताऽऽलवालोपि, क्षीरेण सिक्तोऽपि स्वकटुतां न मुञ्चति। सर्पः गानैः सन्तोषितोऽपि क्षीरेण संवर्धितोऽपि स्वविषं न त्यजति। एवमेव क्रूरे कुले उत्पन्नः स्वीयक्रूरतां न जहाति।

एवमेव दुश्शीलः स्वस्य दुष्टप्रवर्तनं नैव विमुञ्चति। निम्नगामि जलं सेतुनिबद्धमपि नीचप्रवणमेव भवति स्वशीलप्रदर्शनाय रन्ध्रमन्विष्यति। तथैव दुश्शीलः बहूपकृतोऽपि समृद्धोऽपि विज्ञोपि स्वदुश्शीलतायाः प्रदर्शनायावकाशं मृगयते। यद्यवकाशो लभ्येत निस्संदेहं स्वचेष्टामाविष्कुर्यात्। तस्मात् कुलहीनस्य दुश्शीलस्य च आश्रयो न दातव्यः।

अतः मनुजस्य कुलं शीलं च प्रथमतः जानीयात्। यदि स कुलीनः सुशीलश्च भवेत् तर्हि तस्य आश्रयं दद्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्यथा तं दूरतः परिवर्जयेत्। अज्ञातकुलशीलस्य आश्रय-प्रदानात् बहुमुखमनर्थो भवति।

'जरद्गवो' नाम गृध्रः 'दीर्घकर्ण' नाम्नो मार्जारस्य आश्रयदानेन प्राणैर्विमुक्तः आसीत्। अलियरासराजः कस्यचन विमतबालकस्य पोषणेन स्वदयां प्रकटयन् तेनैवांते हतः हिन्दूसाम्राज्य मनाथमकरोत्। परशुरामश्च कर्णाय विद्यां प्रदाय पश्चादतप्यत। सीता च मायाविने रावणाय भिक्षां ददती तेन अवञ्च्यत।

एवं नीतिकथासु पूर्वचरित्रेषु इतिहासेषु च बहवो दृष्टान्ता भवन्ति, अज्ञातकुलशीलानां आश्रयदाने सञ्जातानां दोषाणां विषये।

परन्तु क्वचित्क्वचित् नीचकुला अपि उत्तमगुणाः सन्दृश्यन्ते। यथा - धर्मव्याधः, प्रह्लादः, विभीषणः, नाडीजङ्घः इत्यादयः। दुश्शीला अपि सहवासवशात् सदुपदेशात् च सुशीलाः भवन्ति। यथा - अंगुलीमालः बुद्धस्योपदेशात् चौर्यमत्यजत्। कुम्भजानुः ब्रह्मरक्षः कौशिकसहवासात् साधुः समभवत्।

सत्कुलीना अपि सच्छीला अपि क्वचित्क्वचित् दुष्कर्म-कारिणो दृश्यन्ते यथा – अजामिलः ब्राह्मणोऽपि विन्दित-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

घमानि कर्माणि समाचरत्, यथा च – विश्वामित्रोऽपि श्वमांसभक्षणाय प्रावर्तत ।

एवं स्थिते सत्कुलं सच्छीलमिति तु न नियतं कारणं भवति सदाचारस्य साधुताया वा। अपितु कुत्रचिदन्यथा-भावे सत्यपि अतिमुख्यं कारणं तत् भवति ।

तस्मात् जनैः कुलशीलाऽदिकं विचार्यैव स्वगृहे स्वराज्ये स्वसेवायां वा नियोज्यो भवति जनः । तथा नियुक्तोऽपि प्रतिक्षणमवधानेन अन्वीक्षणीयश्च भवति । अन्यथा आत्मकृतस्य दोषस्य फल मनुभवितव्य मात्मनैव।

विवाहश्च विवादश्च समयोरेव शोभते

— लेखकः – गुण्डेराव हरकारः

विदितमेवेदं सर्वेषां यदा द्वयोः कयोश्चित् कश्चन स्नेहसम्बन्धो जायते तदा नियमेन तयोः साधर्म्यं अस्तीति अनुमीयते । साधर्म्यमन्तरा तयोः स्नेहसम्बन्धः न सञ्जाघटीतीति वक्तुं सुशकम् । समानो धर्मो येषां ते सधर्माणः, तेषां भावः साधर्म्यम् । नैसर्गिकोऽयं नियमः । न केवलं मनुष्येषु, तिर्यक्षु प्राणिमात्रेष्वपि दृश्यते ! उक्तञ्ज —

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

"मृगा मृगैः सङ्गमनं व्रजन्ति,
गावश्च गोभि स्तुरगा स्तुरङ्गैः।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः,
समानशीलव्यसनेषु सख्यम्॥"

इदं हि जातिगुणशीलाऽदिनिबन्धनं नैसर्गिकं सख्यम्। किमु वक्तयं यावज्जीवं सुमुखं प्रतिदिनवर्धमान-परस्परप्रेमातिशयं 'जीवतां वधूवरौ' इति प्रयत्नशतैः क्रिय-माणेषु विवाहाऽऽदिमहोत्सवेषु!

यथा विवाहः समयोरेव शोभते तथा विवादोऽपि समयोरेव शोभते। उक्तञ्च —

"सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपम्" तत्र विवाहः स्त्रीपुरुषयोरेव; विवादस्तु प्रायः पुरुषयोः! क्वचित्पौरुषमधिकमवाऽऽप्ता जगद्रक्षादीक्षा स्थूलकृपाणव्यग्रहस्ता झान्सी लक्ष्मीबायिवत् वनिताः दुष्कृतां विनाशाय प्रभवंत्येवेति 'प्रायः' शब्दप्रयोगः।

'समयोरेव शोभते' इत्यत्र किं तत्साम्यमितिचेत्; विवाहविषये तावत् वधूवरयोः जातिकुलशीलविद्याख्याति-सम्पदादिकृतं साम्यं साधारणं; तत्र वधूवरयोर्वयो-माने तु —

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

"पूर्णषोडशवर्षा स्त्री पञ्चविंशेन सङ्गता ।
कीर्तिमन्तं सुतं सूते............................ ॥"

इत्यादिनियमानुरोधेन तयो र्वयोमाने यादृशमन्तरमपेक्षितं तादृशान्तरविशिष्टमेव साम्यमपेक्षितं; जातिसाम्यं कुलसाम्यञ्च चातुर्वर्ण्यव्यवस्थाप्रकारेणैव ।

वधूवरयोर्गोत्रविषये तु साम्यं नैवापेक्षितं, सगोत्रविवाहस्य भिन्नगोत्रस्यापि पाक्षिकद्विप्रवरसाम्ययोगे निषिद्धत्वात्, तेन कुलाऽऽचारात् देशरूढेर्वा बालयोर्वाबालावृद्धयोर्वा क्रियमाणो विवाहः नैव शोभा मातनोतीति स्पष्टम्! कुलविषये, "स्त्रीरत्नं दुष्कुलादपी" त्यपि दृश्यते । चातुर्वर्ण्यं जन्मप्राप्तं वा गुणकर्मप्राप्तं वा इत्यद्यापि विवादग्रस्तो विषयः! अधुनातने काले न केवलं रैल् - मोटर् प्रभृतिभिः, दुस्तरवारिराशितरणसाधनैर्महापोतादिभिश्च, दूरप्रवासे सौलभ्यमेवोत्पादितं; किन्तु विमानयानेन उद्दिष्टस्थलप्राप्तौ अविलम्बितत्वमपि समुत्पादितम् । तेन आन्तरराष्ट्रीयविवाहोऽपि दुर्वार उपतिष्ठते ! !

विवादो विषयभेदेनाऽनेकविधः ।

(१) विद्याविषयः – शास्त्रवादः न्यायमीमांसाऽऽदिगहनदुस्तर्कशास्त्राभ्यासपाटवं ययोर्विद्यावतोः समं तयोरेव विवादः शोभते । अत एव आनन्दवर्धनाचार्येण शाब्दि-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

काभिमतस्फोटसिद्धान्तानुसारिभिः सूरिभिः वाच्यसर्वस्व-सारमलङ्कारमेव काव्याऽऽत्मानं मन्यमानैः ध्वनितत्त्व मनङ्गीकुर्वाणैः सह प्राप्तमपि वादं न तेष्वीर्ष्याकलुषित-शेमुषीकत्वमाविष्करणीयमिति परित्यज्य, युक्तिमतिशक्ति-प्रमाणबलीयस्त्वाऽऽदिभिः समैरेव तार्किकैः सह वाद आरब्धः ।

(२) व्यवहारविषयः – वस्तुस्वत्वमधिकृत्य न्याय-वादिनां विवादः प्राड्विवाकन्यायसभासु राजशासन (Law) व्यवहारवादे पक्ष - प्रतिपक्ष - नियुक्तन्यायवादिनः (Advocates) परस्परं विवदमानाः राजशासनप्रवर्धित-समस्तव्यवहारस्मृतिशास्त्रवैशारद्यं सममेव अपेक्षन्ते ।

(३) द्वन्द्वयुद्धाऽऽदिषु – व्यायामादिना समवाप्त-शरीरपाटवयोः मेदसः क्षयेण विभक्तघनगात्रयोः युद्ध-प्रवृत्तयोः कलावैशारद्यं सममेव अपेक्षितः ।

(४) महायुद्धं — मन्त्रिकोशाऽऽयुधसैन्याऽऽदिबलं द्वयोः पक्षयोः सममेवापेक्षितम् ।

अत्रेद मवधेयम् – 'विवाहश्च विवादश्च समयोरेव शोभते ।' इति स्मृतिमूल एव प्राचीनपरम्परासमासा-दितोऽयं सम्प्रदायः । असमयोरुत्तमाधमयोर्वा विवाहः विवादो वा नैव सङ्घटते इति तु न। किन्तु स न

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शोभते इत्येव तात्पर्यम् । अयमेव नियमविधिरिति शास्त्रेषु प्रसिद्धः । नानासाधनसाध्यक्रियायां एकसाधन-प्राप्तौ अप्राप्तस्यापरसाधनस्य प्रापको विधिः नियमविधि-रिति । यथा – "व्रीहीनवहन्ति" इत्यादि । वैतुष्यस्य नानोपायसाध्यत्वेन यथा अवघातं परित्यज्य उपायान्तरं ग्रहीतुमारभते तदा अवघातेनैव तुषविमोकः कार्य इति नियमः, तथा विवाहस्य स्त्रीपुरुषयोः विवादस्य कयोश्चि-त्पिस्पर्धिषोश्च सम्भवत्वेऽपि पूर्वोक्तप्रकारेण समयोरेव शोभते, नियम्यत इति तात्पर्यम् ।

१. विवाहविषये —

(१) रघुवंशे —

इन्दुमतीविवाहप्रसङ्गे —

"रतेःर्गृहीतानुनयेन कामं,
प्रत्यर्पितस्वाङ्गमिवेश्वरेण ।
काकुत्स्थमालोकयतां नृपाणां,
मनो बभूवेन्दुमतीनिराशम् ॥

संमिलितानां राजकुमाराणामियमुक्तिः — न वयं लावण्ये इन्दुमतीसमा इति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(२) जानकीस्वयंवरे तावत् जनककृतः पणः "अहह ! तात ! पणस्तव दारुण" इति प्रसिद्ध एव। तथापि श्रीरामेण कृतः शिवधनुर्भंगः —

"आततज्यमकरोत्ससंसदा विस्मयास्तिमितनेत्रदीक्षितः।
शैलसारमपि नातियत्नतः पुष्पबाणविपेशलं स्मरः ॥"

सभासद्भिः स्तिमितलोचनं विस्मयेन वीक्षितः इत्यनेनैव न कोऽपि सामर्थ्ये सौन्दर्ये वा रामेण सम इति ध्वन्यते।

(३) नैषधे दमयन्तीविवाहप्रसङ्गे — नानादेशेभ्यः द्वीपेभ्यश्चाऽऽगतान् साक्षात्सरस्वत्या देव्या समुपवर्णितान् दिव्यप्रभावान् राजपुत्रान् परित्यज्य नलरूपधारिणो महेन्द्रादिदेवांश्च धिक्कृत्य नलविशेषगुणलुब्धा नलमेव वृतवती दमयन्ती। इद मनन्यलभ्यं प्रेमसाम्यम्। अत्रैव स्वयंवरशब्दः अन्वर्थकः।

(४) कुमारसम्भवे त्वन्य एव प्रकारः — स्वशरीर-सौन्दर्यं प्रियमनोहरणाय नालं; "प्रियेषु सौभाग्यफला हि चारुता" इति विनिश्चित्य घोरं तपश्चचार पार्वती। तत्रापि स्वयमीश्वरेण वटुरूपधारिणा "द्वयं गतं सम्प्रति शोचनीयतां" इत्यादिवाक्यैः उपालब्धा बुद्धिभेदं कारि-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ताऽपि न तत्याज सा शिवपाणिग्रहणविचारम् । तस्याः निश्चयेन सन्तुष्टः शिवः प्रसन्नोऽभूत् । अयं पाणिग्रहण-प्रकारस्त्वपूर्वः केवलं पूर्वदैहिकवासनाप्रेरिताऽऽत्मसाम्य-निबन्धनरूपः ।

२. विवादविषये —

(१) किरातार्जुनीये —

'इयञ्च दुर्वारमहारथाना
माक्षिप्य वीर्यं महतां बलानाम् ।
शक्तिर्ममावश्यति हीनयुद्धे
सौरीव ताराधिपधाम्नि दीप्तिः ॥'

किरातेन सह युद्धं हीनयुद्धमिति मन्यमानस्य अर्जुनस्य इयमुक्तिः हीनेन सह योद्धुमसंमतिं व्यनक्ति ।

(२) कुमारसंभवे —

निदाघधामक्लमविप्लवानां
नवीनमन्त्रोदमिवौषधीनाम् ।
सुनन्दनं नन्दनमात्मनो नः,
सेनान्यमेनं स्वयमादिश त्वम् ॥"

एतेन दृप्ततारकवधाय नान्यः समर्थः कुमारेण विनेति सर्वेषां इन्द्राऽऽदीनां त्रिदशानामभिप्रायः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(३) माघेऽपि — महति सैन्ये सम्पराये क्षीणतां प्रयाते शिशुपालः श्रीकृष्णं युद्धाय प्रेरयति ।

"मुखमुल्लसितं त्रिलेखमुच्चैः,
भिदुरभ्रूयुगभीषणं दधानम् ।
समितावित्ति विक्रमानमृष्यन्,
गतभीराह्वत चेदिराण्मुरारिम् ॥"

श्रीकृष्ण एव मत्समः, तेन सहाहं योत्स्ये इति शिशुपालाभिप्रायः ।

संस्कृतभाषाप्रचारोपायाः

शिरोमणिः कप्पगन्तुल लक्ष्मणशास्त्री

संस्कृतभाषायाः महत्वं तस्याः प्रचारस्य आवश्यकता च स्वतन्त्रे भारतदेशे सर्वैरपि जनैः अङ्गीक्रियते । अनेकाः संस्थाः, संस्कृतभाषाभिमानिनः कतिचन सज्जनाः विद्वांसश्चापि व्यक्तिगतरूपेण संस्कृतप्रचारार्थं सकटिबद्धं प्रयत्नशीलाः संदृश्यन्ते । परन्तु अस्यां दिशि विशिष्टं कर्म क्रियमाणं न दृश्यते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

देववाण्याः प्रचारः अवश्यं कर्तव्यः इति निस्संशयं प्रतिभाति । अतः केचन उपायाः सूच्यंते ।

१. सर्वप्रथमं अनुसरणीयः उपायस्तु विद्यालयेषु प्राच्यपाश्चात्य भाषाबोधकेषु संस्कृतस्य अवश्यपाठ्यत्वं संपादनीयम् ।

२. भारतीयेषु सर्वेषु प्रांतेषु राज्यशासकैः संस्कृत-विद्यायाः कृते अभिज्ञस्य अध्यक्षस्य पार्थक्येन नियोजनं कृत्वा सः राज्यसंस्कृतशिक्षाविभागस्य पर्यालोचनाधिकारी कर्तव्यः ।

३. संस्कृतविद्यालयेषु अध्ययनं कृत्वा तेभ्यो निर्गतानां स्नातकानां विद्यालयांतरेषु अन्यैरध्यापकैस्साकं तारतम्यं विना अध्यापकपदेषु नियोगः कर्तव्यः ।

४. संस्कृताध्यापकानां कृते शिक्षणालयाः स्थाप-नीयाः ।

५. अल्पेनैव समयेन संस्कृतभाषायां परिचयं, विज्ञानं च अधिगन्तुं उपयुक्तानि पुस्तकानि कानिचित्, आंग्लभाषामयानि, आधुनिकनवीनविषयाणां विज्ञापकानि संस्कृते अनूद्य वा, संस्कृतमौलिकानि वा निर्माय वा तेषां परिचयः संस्कृतच्छात्रेभ्यः दापनीयः । तादृशपुस्तकानां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निर्माणार्थं सर्वेषु प्रांतेषु प्रत्येकं योग्यविदुषां समितयः नियोज्याः ।

६. प्रतिग्रामं विदुषां मुखेन पुराणानां प्रवचनं कारयित्वा पुराणेषु विराजमाना भारतीयसंस्कृतिः साधारणजनेभ्यः परिचिता कर्तव्या ।

७. संस्कृतविद्वत्सु परस्परं विद्यमानं योग्यतायाः, अवस्थायाश्च भेदभावं विस्मृत्य सर्वेषामपि संस्कृतज्ञानां समानं सम्मानं कर्तव्यम् ।

८. संस्कृतपाठशालासु आंग्लेयपाठशालासु च विद्यमानानां अध्यापकच्छात्रगणानां परस्परं सौहार्दं सम्पाद्य सर्वैरपि मिलित्वा संस्कृताभिवृद्धये प्रयत्नशीलैर्भाव्यम् ।

९. अस्मिन् समये संस्कृतविद्यालयेषु विद्यार्थिनां संख्यायाः अतीव ह्रासो दृश्यते । प्रतिवर्षं ह्रासस्य अधिकता अनुभूयते । अतः तन्निरोधार्थं छात्रेषु संस्कृतभाषायां रुचिरुत्पादनीया । यदि तैस्साकं नित्यव्यवहारेषु भोजनालयेषु क्रीडांगणेषु च प्रान्तीयभाषया साकं संस्कृतेनापि व्यवहारं कर्तुं अध्यापकैः प्रयत्नः साध्येत, तर्हि छात्राणां तस्यां भाषायां रुचिरुत्पाद्येत । अस्यां दिशि पंडितैः प्रयत्नः कर्तव्यः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१०. तत्र तत्र स्थानेषु विद्यालयेषु च अध्यापकाः छात्राश्च साप्ताहिकी वा, पाक्षिकी वा संस्कृतवाग्वर्धनार्थं सभा प्रचालयितव्या। तासु सभासु प्रांतीयभाषाद्वारा वा संस्कृतभाषाद्वारा वा संस्कृतभाषायाः प्राशस्त्यं, सौलभ्यं च सर्वजनेभ्यः निवेदनीयम्। कीदृशानां पुस्तकानां पठनेन संस्कृते परिचयो वर्धेत इति सूचयितुं तादृशानां पुस्तकानां सूची जनेभ्यो दातव्या।

११. सुलभसंस्कृतभाषायां व्याख्यानकरणे समर्थानां पंडितानां सम्भाषणाऽदिकं प्रायः नियोज्यम्।

१२. संस्कृतज्ञानां संस्कृताभिमानवतीनां च महिलानां संस्कृतमहिलासम्मेलनाभिधं किञ्चित् सदः निर्माय महिलाद्वारा संस्कृतप्रचारः कर्तव्यः।

१३. भारतीयसंस्कृतिप्रचारकसंस्थाद्वारा संस्कृतप्रचारः अवश्यं कर्तव्य इति अनुरोधः कर्तव्यः। प्रान्तीयभाषाविद्यालयेषु, आंग्लभाषाविद्यालयेषु च संस्कृताध्यापकच्छात्रैः काचन संस्कृतपरिषद् निर्माय तद्द्वारा तत्रत्याः संस्कृतेतरा अध्यापकाः संस्कृताभिज्ञाः कार्याः।

१४. स्वकुटुम्बेषु संस्कृतविद्वांसः विद्यार्थिनश्च यथासाध्यं बन्धुभिस्साकं सरलसंस्कृतवाक्यैः व्यवहारं कुर्युः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१५. सरलतया ज्ञायमानान्येव संस्कृतपदानि वाक्यानि च विद्वद्भिः प्रयोज्य ततः छात्राणां सामान्य-जनानां च तस्यां रुचिरुत्पादनीया ।

१६. वयोऽधिकानां कृते संस्कृतरात्रिपाठशालाः स्थापनीयाः । तदर्थं पाठ्यग्रन्था अपि निर्मेयाः । ग्रामे ग्रामे गृहस्थपण्डितैः संस्कृतपाठशालाः प्रचालनीयाः । तासु बालका बालिकाश्च अध्यापनीयाः ।

१७. कथावाचनद्वारा प्रवचनानां च द्वारा पण्डितैः संस्कृतप्रचारः कर्तव्यः ।

१८. संस्कृतनाटकानां रूपकाणां च, अभिनयं कृत्वा तद्द्वाराऽपि सामान्यजनेषु तद्भाषां प्रति रुचि-रुत्पादनीया ।

१९. सुलभसंस्कृतमयानि राष्ट्रीयगीतानि निर्माय सर्वेषु राज्येषु राष्ट्रीयतायाः प्रचारः कर्तव्यः ।

२०. संस्कृतकवीनां सम्मेलनानि प्रतिमासं कृत्वा जनसामान्ये संस्कृतकवितायां रुचिः उत्पादनीया ।

२१. कालिदासाऽऽदिकाव्यानां परिचयः सुलभ-संस्कृते लिखित्वा बहुमूल्यस्य साहित्यभंडारस्य सामान्य-जनेषु प्रचारः कर्तव्यः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२२. व्यास - वाल्मीकि - काळिदासाऽऽदीनां महाकवीनां देशे सर्वत्र जन्मोत्सवान् कृत्वा तद्द्वारा तेषां कवीनां प्रभावः प्रचारपदं नेयः ।

२३. देशे सर्वत्रापि राज्यशासने अधिकारिणः, रक्षणशाखायामधिकारिणः, विश्वविद्यालयेषु आचार्याः, कुलपतयः, उप-कुलपतयः, चिकित्सकाः, इत्येवमादयो बहवो जनाः संस्कृतं किञ्चित् जानन्ति वा तदनुरागिणश्च वा भवन्ति । संस्कृतविद्वद्भिः प्रचारकैश्च तेषां संघटनं, संग्रहं, परिचयं च सम्पाद्य संस्कृतप्रचारार्थं तादृशानामपि संस्कृतानुरागिणां सहयोगः सम्पादनीयः ।

२४. संस्कृतानभिज्ञाः पुरोहिताः वेदाध्यायिनः देवालयार्चकाश्च संस्कृताध्ययने प्रोत्साहितव्याः ।

२५. अस्माकं देशस्य नेतृगणश्च संस्कृताभिमानी कार्यः । तैरेव हि सामान्यजनो नीयते ।

२६. 'इस्लाम्' मतानुयायिनः 'क्रिस्तु' मतानुयायिनश्च संस्कृताभिज्ञाः कर्तव्याः । तथा कृत्वा तेषां हृदयेषु भारतीयत्वं संस्थापनीयम् । संस्कृताध्यपकानां समुचितं वेतनं स्थानं दापयितुं राज्यशासनात् सहायताप्राप्त्यर्थं प्रयत्नः प्रचारकैः कर्तव्यः ।

२७. देवायतनेषु अन्येषु च धार्मिकस्थानेषु संस्कृतस्य प्रचारः कर्तव्यः । तत्संस्थानां धनमपि संस्कृतस्य प्रचा-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रार्थं अध्यापनार्थं च विनियोज्यं, तदर्थं प्रयत्नः प्रचारकैः कार्यः ।

२८. संस्कृते ग्रन्थलेखकानां प्रोत्साहं दत्वा तेभ्यः पुरस्काराऽदिकमपि दापनीयम् ।

२९. प्रचारपदं अनधिरूढानामुत्तमसंस्कृतग्रन्थानां अध्ययनाध्यापनद्वारा प्रचारस्साधनीयः ।

३०. संस्कृतविदुषां संस्कृतसेवकानां च सम्माननं कृत्वा तद्द्वारा तेषां उत्साहः सहयोगश्च प्रचारकैः देयः ।

३१. सुलभसंस्कृतपरीक्षाः प्रचालयितव्याः । तदुपयोगीनि च पुस्तकानि लेख्यानि ।

३२. संस्कृते बालकानां कृते वाद-विवादसभाः प्रचालयितव्याः । तेषां पुरस्काराश्च देयाः ।

३३. आधुनिकसाहित्यस्यापि ग्रन्थाः संस्कृते लेखनीयाः । तद्द्वारा लघुकथाः गेयकाव्यानि इत्यादिकेषु विषयेषु छात्राणां रुचिरुत्पादनीया ।

३४. संस्कृतप्रचारार्थं प्रांतीयभाषाणां साप्ताहिकीः पाक्षिकीः मासिकीर्वा पत्रिकाः प्रकाश्य संस्कृतानभिज्ञेभ्यः तत्परिचयः देयः ।

३५. संस्कृतविदुषां महाकवीनां च चित्राणि ग्रन्थालयेषु पठनालयेषु अन्येषु च प्रजास्थानेषु स्थापयित्वा तेषां परिचयस्सामान्यजनेभ्यो दातव्यः ।

20

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३६. उच्चकोटिकैसंस्कृतविद्वद्भिः संस्कृतप्रचारार्थं देशे भ्रमणं कर्तव्यम् ।

३७. विदेशेष्वपि संस्कृतप्रचारः कर्तव्यः ।

३८. विज्ञानशास्त्रीयाणां ग्रन्थानां अनुवादः सुलभ-संस्कृते कार्यः ।

३९. यावच्छक्यं सर्वजनसुज्ञेयान्येव संस्कृतपदानि प्रयोज्य प्रचारः कर्तव्यः ।

उदाहरणतया – जल-सूर्याऽऽदिसाधारणशब्दान् विसृज्य पांडित्यप्रकटनार्थं कबन्ध-विकर्तनाऽऽदि-शब्दाः न प्रयोज्याः। तादृशः सामान्य-जनदुर्बोध्या भवन्ति ।

४०. सुदीर्घसमासानो प्रयोगो न कर्तव्यः। भाषायाः प्रौढीकरणेन तदध्ययने सामान्यजनस्य उद्वेगो भवेत् । असमस्तेष्वपि सुलभसंस्कृतपदेष संधेः काठिन्यं न कार्यम् ।

एवंविधैः अन्यैश्च अनेकैरुपायैः सामान्यजनेभ्यः संस्कृतभाषा सुबोध्या कर्तव्या ।

एतदन्ये च यदि केचन उपायास्स्युः, तर्हि पंडिताः तान् प्रकाशयन्तु इति सविनयं विज्ञापयामि ।

विजय मुद्राक्षरशाला, चित्तूरु।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विजयप्रेस् चित्तूरु (आ. प्र.)

CC-0. In Public Domain. Cuddalore Collection. TN.